अथश्रीमद्भागवतअष्टमस्कंधचूर्णिकाप्रारंभः



श्रीगणेशायनमः श्रीमत्कुलदेवतायैनमः अथाऽष्टमस्कंधव्याख्या राजोवाच हेगुरोस्वायंभुवमनोः वंशः मयाश्रुतः य
त्रमनुकन्यासुमरीच्यादीनांपुत्रादिसर्गः अन्यान्मनूंव्वद यत्रयत्रहरेःजन्मानिकर्माणिच कवयःगृणंतितानिवद तथाभगवान्
गतमन्वंतरेयत्कृतवान् भाव्येयत्करिष्यति वर्त्तमानेयत्कुरुतेतदपिब्रूहि श्रीशुकउवाच अस्मिन्कल्पेस्वायंभुवादयः
मनवः ६ गताः तत्राद्यमनुः तेकथितः तस्यकन्ययोः आकूतिदेवहूत्योः धर्मज्ञानोपदेशार्थे हरिःपुत्रतांगतः तत्रकपिलकृतंउक्त
म् यज्ञःयच्चकारतदाख्यास्ये अथस्वायंभुवमनुःविरक्तःसन् राज्यंहित्वासभार्यः वनंप्रविश्यसुनंदायांनद्यां वर्षशतं एकेनपदाभु
वंस्पृशन् घोरंतपः तप्यमानःइदंउपदिशन्निवआह येनविश्वंचेतयते विश्वंतुयंनचेतयते किंच जनेसुप्तेयःजागर्त्तितंजनःनवेद
सतुइमंवेद किंच यंपश्यंतंजनःपश्यति यस्यपश्यतःज्ञानंननश्यति तंदेवंभजध्वम् किंच यस्यआद्यंतादीनिनसंति विश्वस्यतु
तानियस्माद्भवंति सःविश्वकायःअजयाविश्वस्यजन्मादीनिधत्ते तांविद्ययोदस्यनिरीहआस्ते अतःकर्मसुनविषज्जते तंभग
वंतं रामकृष्णाद्यवतारैः वेदोक्तंकर्म आचरंतंनृन् स्वाचारेणशिक्षयंतंसर्वधर्मप्रवर्त्तकंप्रभुंप्रपद्ये श्रीशुकउवाच एवंसमा-
धौमंत्रोपनिषदंउच्चारयंतंमनुं दृष्ट्वा असुराः यातुधानाः तंजग्धुं अभ्यद्रवन् तदाआकूतिपुत्रोयज्ञः स्वपुत्रैःयामैर्वृतःसन् तान्-
हत्वा स्वर्गंअपालयत्अथमन्वंतराण्याह तत्राद्यम् स्वायंभुवोमनुः १ प्रियव्रतोत्तानपादौमनुपुत्रौ २ यामादयोदेवाः ३ मरीचिप्र
मुखाःसप्तर्षयः ४ यज्ञोहरेरवतारः ५ सएवइंद्रः ६ ततःद्वितीयम् अग्नेःपुत्रः स्वारोचिषोमनुः १ द्युमत्सुषेणरोचिष्मदादयः त
त्सुताः २ रोचननामाइंद्रः ३ ऊर्जस्तंभादयःसप्तर्षयः ४ तुषितादयोदेवाः ५ वेदशिरसः ऋषेःतुषितायांविभुरित्यवतारः ६ तस्मा १
त् अष्टाशीतिसहस्राणिऋषयः ८८००० ब्रह्मचर्यव्रतं अन्वशिक्षन् ततःतृतीयम् प्रियव्रतसुतःउत्तमोनाममनुः १ पवनसृंज-

ओ· ६ चेतनीभवति, ओ· ६ चेतनीकरोति·

याद्याः तत्सुताः २ वसिष्ठात्मजाः प्रमदादयः सप्तर्षयः ३ सत्यादयो देवाः ४ सत्यजित् इंद्रः ५ धर्मात् सूनृतायां सत्यसेनोऽवतारः ६ सः यक्षराक्षसान् अवधीत् तवः चतुर्थम् उत्तमभ्रातातामसो मनुः १ पृथुः ख्यातिः नरः केतुः इत्याद्याः दशतत्सुताः २ सत्यकाः हरयो- वीरादेवाः ३ त्रिशिखः इंद्रः ४ ज्योतिर्धामाद्याऋषयः ७।५ हरिमेधसः विप्रस्य हरिण्यां स्त्रियां हरिः अवतारो जातः ६ येन ग्राहात् गजेंद्रो मोचितः राजोवाच हे शुक हरिः यथा गजपतिं अमूमुचत् तत् वयं श्रोतुमिच्छामहे सूतउवाच राज्ञा एवं कथासु चोदितः शुकः मुनीनां सदसि पार्थिवं उवाच इत्यष्टमे प्रथमः १ श्रीशुकउवाच हे राजन् कश्चित् त्रिकूटनामाद्रिः क्षीरोदेनावृतः अयुतयोजनोच्छ्रायविस्तारः आसीत् सः रौप्यायसहिरण्मयैः त्रिश्रृंगैः दिशः खं रोचयन्नास्ते हरिन्मरकताश्मभिः श्यामां भूमिं करोति क्रीडद्भिः सिद्धचारणादिभिः जुष्टकंदरः चित्रद्रुमसुरोद्यानकलकंठविहंगमः स्वच्छोदकैः सरित् सरोभिर्युतः मणिमयवालुकैः पुलिनैर्युतः एवंभूताचलस्य द्रोण्यां वरुणस्य ऋतुमन्नाम उद्यानं आस्ते कथंभूतं तत् सुरस्त्रीणामाक्रीडम् किंच मंदारपारिजातपाटलाऽशोकचंपकचूतप्रियालपनसाम्राम्रातकक्रमुकनारिकेरखर्जूरबीजपूरमधुकसालतालतमालासनार्जुनारिष्टोदुंबरप्लक्षवटकिंशुकचंदनपिचुमंदकोविदारसुरदारुद्राक्षेक्षुरंभाजंबूबदरिबिल्वकपित्थजंबीरभल्लातकादिभिः वृक्षैः वृतः त्रिकूटः तत्र सरोवरं अद्भुतमास्ते तत् किंभूतम् लसत्कांचनपंकजकुमुदोत्पलादीनां श्रिया ऊर्जितं मत्तषट्पदशकुंतैः नादितं हंसकारंडवादिभिः व्याप्तं जलकुक्कुटादीनां कुलैः कूजितम् मत्स्यकच्छपादीनां संचारेण चलत्सद्मरजोभिः व्याप्तोदकं कदंबवेतसनलनीपकुंदस्वर्णयूथीपुन्नागजातीमल्लिकादिभिः शोभितम् तत्र एकदा गिरिकाननाश्रयः गजेंद्रः करेणुभिः चरन् कंटककीचकवेणुवेत्रादिगुल्मं प्ररुजन् सन् बभ्राम यद्गंधमात्रात् सिंहगजेंद्रव्याघ्रादयः भयात् पलायंते क्षुद्राः वृक

हरिणादयः तद्दृष्टिपथं हित्वा यत्कृपया अभीताः चरंति एवं भ्रमन् घर्मतप्तः सः गजैः गजीभिः कलभैश्च अनुद्रुतः अलिकुलैः सेव्य-
मानः स्वगरिम्णा गिरिं कंपयन् दूरादेव पंकजरेणुमिश्रं सरोनिलं जिघ्रन् तृषार्दितेन स्वयूथेन वृतः सन् सरोवराभ्याशं अगमत् तत्र वि
गाह्य गतक्लमः सन् उत्पलरेणुवासितं जलं कामं पपौ स्वशुंडायोद्धृताद्भिः आत्मानं स्नपयन् करेणूः कलभांश्च स्नपयन् पाययन् अ
जमायया प्राप्तं संकष्टं नाचष्ट तत्र कश्चिद्दैवचोदितः बलीयान् ग्राहः रुषा तं चरणे अग्रहीत् एवं दुःखं प्राप्तो गजः यथाबलं विचक्रमे-
तथाविधं तं अन्ये गजाः मोचयितुं नाशकन् करेणवः विचुक्रुशुः एवं इभेंद्रनक्रयोः अंतर्बहिः मिथः विकर्षतोः वर्षसहस्रं अगमत्
ततो गजेंद्रबलस्य व्ययः अभूत् नक्रस्य तु बलाधिक्यं जातम् एवं गजेंद्रः यदा संकटं आप तदा चिरं ध्यात्वा इमां बुद्धिं प्रत्यपद्यत
अहो इमे गजाः आतुरं मां मोचितुं न प्रभवः करिण्यः कुतः अहं ग्राहरूपेण विधातुः पाशेन आवृतोऽपि तं शरणं यामि यः ईशः अं
तकसर्पात् भीतं जनं पातितं शरणं व्रजेम ३२ इत्यष्टमे द्वितीयः २ श्रीशुकउवाच एवं बुद्ध्याव्यवसितः गजेंद्रः मनः स-
माधाय प्राग्जन्मनि अनुशिक्षितं परमं स्तोत्रं जजाप गजेंद्रउवाच यतः चिद्रूपात् एतत् देहादिकं सचेतनं भवति तस्मै पूर्षुका
रणत्वेन प्रविष्टाय परेशाय भगवते केवलं नमनं अभिध्यायेम कायप्रणतेः अशक्यत्वात् किंच यः कार्यकारणात् परः तं स्वयंभु
वं शरणं व्रजामि सः स्वयंप्रकाशः मां अवतु अहो देवाः ऋषयः यस्य स्वरूपं न विदुः तं कोऽपि जंतुः ज्ञातुं वक्तुं वा अर्हति किम् सः दु
र्गमचरितः मां अवतु यस्य पदं द्रष्टुमिच्छवः मुनयः वने ब्रह्मचर्यादिव्रतं चरंति सः मे गतिरस्तु अपिच यस्य जन्मादीनि न संति त
थापि लोकाप्ययसंभवार्थं जन्मादीनि यः धत्ते तस्मै परेशाय ब्रह्मणे परमात्मने कैवल्यनाथाय शांताय क्षेत्रज्ञाय सदाभासाय अखि
लकारणाय स्वयंप्रकाशाय मादृक्प्रपन्नपशुपाशविमोक्षणाय भूरिकरुणाय आत्मात्मजाप्तगृहवित्तजनेषु सक्तैः आसुमशक्या

यगुण संगविवर्जिताय देहादिष्वनासक्तैः चिंतितायज्ञानात्मने ईश्वरायनमोऽस्तु किंच यंधर्मकामार्थविमुक्तिकामाः भजंतः इ-
ष्टांगतिंप्राप्नुवंत्येव किंतु अन्याअपिआशिषः अव्ययंदेहंचरांति एवंयः अदभ्रदयः सःमेविमोक्षणंकेवलंकरोतु नाधिकंप्रार्थये
एतावदपिभक्तिसुखानभिज्ञत्वेनवांछामि अहोयस्य एकांत भक्ताः येतेकंचनअर्थनवांछंति तंपरिपूर्णअनंतं स्तौमि किंच ब्र
ह्मादयोदेवाः वेदाःलोकाश्चनामरूपभेदेनयस्य कलयाकृताः सःदेवासुरमर्त्यतिर्यक्नस्त्रीषंढः पुमान् नतर्हिसर्वनिषेधेयः अव
शिष्यते सःपरमात्मामद्विमोक्षणाय आविर्भवतु अहंग्राहात् शरीरमोक्षणेनजीवितुंनेच्छामि किंतु अज्ञानमोक्षंइच्छामि सोऽ
हंमुमुक्षुःकेवलंब्रह्मप्रणतोऽस्मि नतुतंजानामि किंच योगिनः यंहृदिपश्यंतितंनतोऽस्मि हेईश प्रपन्नपालायतुभ्यंनमोऽस्तु
किंच यंस्वमात्मानंअयंजनः नवेद तंईश्वरंआश्रितोऽस्मि श्रीशुकउवा० एवंउपवर्णितंनिर्विशेषंगजेंद्रंविविधमूर्त्तिभेदाभि
मानिनः ब्रह्मादयः यदानोपजग्मुः तदासर्वदेवमयमूर्त्तिः हरिः आविरासीत् ततःजगन्निवासः तंआर्त्तंउपलभ्यतत् स्तोत्रंचनिश-
म्य स्तुवद्भिः देवैः सहहरिः वेदोमयगरुडेनऊह्यमानः चक्रायुधः सन् यत्रगजेंद्रः तत्रआशुअभ्यगमत् तदागजेंद्रःसरसिउरुबले
नग्राहेणगृहीतः आर्त्तःसन् गरुत्मतिधृतचक्रंहरिंदृष्ट्वासांबुजकरंऊर्ध्वंकृत्वा हेनारायणाखिलगुरोभगवन्नमस्ते इतिदीनांगिरंआह
तदाअजःआर्त्तंतंवीक्ष्य सहसागरुडात् अवतीर्यकृपयाआशुसरसःसग्राहंतंउज्जहार ततःदेवेषुपश्यत्सुहरिः चक्रेणग्राहंविदार्य
गजेंद्रममूमुचत् ३३ इत्यष्टमेतृतीयः ३ श्रीशुकउवा० तदादेवर्षिगंधर्वाब्रह्मेशानपुरोगमाः तत् हरेःकर्मशंसंतः पुष्पवृष्टिं
चक्रुः दुंदुभयोनेदुः गंधर्वाःननृतुः जगुश्च ऋषयः चारणाः सिद्धाः तुष्टुवुः हेराजन् योऽयंग्राहः सःहूहूः गंधर्वः असौदेवलशापेनग्रा
होजातः सःसद्यः मुक्तः सन् हरिंप्रणम्य स्तुतिंचक्रे ततःईशेन अनुकंपितःसन् तंपुनः परिक्रम्यप्रणम्यचस्वंलोकंअगात् ततःगजेंद्रःभ

ओ॰२ ददाति, ओ॰७ मूर्त्तिभेदंविनापरंतत्वम्

गवत् स्पर्शात् अज्ञानबंधनात् मुक्तः भगवद्रूपं प्राप्तः हे नृप सः द्रविडदेशे पांड्यः विष्णुव्रतपरायणः पूर्वं इंद्रद्युम्ननामराजा आसीत् सः म
लयाद्रौ एकदा आराधनकाले धृतमौनः जटाधरः स्नातः सन् हरिं अर्चयामास तत्र यदृच्छया सशिष्यः अगस्त्यः आगमत् तं अकृतार्हणा
दिकं तूष्णीं स्थितं वीक्ष्य मुनिः चुकोप आह च अयं असाधुः विप्रावमंता गजवत् स्तब्धमतिः अतः अयं गज एव भवतु श्रीशुकउवा॰
एवं शप्त्वा ऋषिः गतः ततः इंद्रद्युम्नोपि दैवप्रापितं सर्वं पश्यन् आत्मस्मृतिविनाशिनीं कौंजरीं योनिमापन्नः तथापि हर्यर्चनानुभा
वेन गजत्वेऽपि अनुस्मृतिः जाता एवं भगवान् गजेंद्रं विमोक्ष्य पार्षदगतिं गमितेन तेन युक्तः सन् विबुधादिभिः स्तूयमानः गरुडासनः
स्वभवनं अगात् हे राजन् एवं मया तव कृष्णानुभावः वर्णितः इदं गजेंद्रमोक्षणं शृण्वताम् स्वर्ग्यं यशस्यं पापापहं दुःस्वप्ननाश
नमस्ति अतः एतत् श्रेयस्कामाः द्विजाः प्रातः उत्थाय दुःस्वप्नाद्युपशांतये कीर्त्तयंति हरिः गजेंद्रं इदं आह श्रीभगवानुवाच हे ग-
जेंद्र ये मां त्वां इदं सरः गिरिकंदरकाननं वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ब्रह्मणः मे शिवस्य च धिष्ण्यानि इमानि शृंगाणि क्षीरो
दं श्वेतद्वीपं श्रीवत्सं कौस्तुभं मालां गदां सुदर्शनं शंखं सुपर्णं शेषं श्रियं ब्रह्माणं नारदं भवं प्रन्हादं अवतारकर्माणि सूर्यं सोमं अग्निं प्र
णवं सत्यं मायां गोविप्रान् दक्षकन्याः गंगां सरस्वतीं नंदां कालिंदीं ऐरावतं ध्रुवं सप्तर्षीन् पुण्यश्लोकान् मानवान् इत्यादीनि मेरूपाणि
अपररात्रांते उत्थाय ये स्मरंति ते पापात् मुच्यंते किंच प्रातः त्वत् कृतस्तोत्रेण ये मां स्तुवंति तेषां प्राणात्यये विमलां मतिं ददामि श्री
शुकउवाच हृषीकेशः इत्यादिश्य शंखं प्राध्माय देवानीकं हर्षयन् गरुडं आरुरोह २६ इत्यष्टमे चतुर्थः ४ श्रीशुकउवाच
हे राजन् हरेः अघनाशनं कर्म गजेंद्रमोक्षणं तत् उदितम् अथ रैवतमन्वंतरं शृणु पंचमो रैवतो नाम मनुः तत्पुत्राः बलिविंध्यादयः विभुः इंद्रः ३
भूतरयाद्याः देवाः हिरण्यरोमादयः ऋषयः शुभस्य विकुंठायां पत्न्यां वैकुंठः अवतारः लक्ष्म्याः प्रियकाम्यया येन वैकुंठ लोकः कल्पितः तस्य

प्रभावगुणादयः तृतीयस्कंधादिषु कथिताः षष्ठः चाक्षुषो नाम मनुः पुरुः पुरुषाद्याः तत्पुत्राः मंत्रद्रुमः इंद्रः आप्यादयो देवाः हविष्म
द्वीरकादयो मुनयः वैराजात्संभूत्यां अजितो नाम अवतारः येन पयोनिधिं निर्मथ्य सुराणां सुरा साधिता किंच कूर्मरूपेण अंभसि
मंदराद्रिर्धृतः राजोवाच हे ब्रह्मन् यथा भगवता क्षीराब्धिः मथितः यदर्थं अद्रिं दधार यथा च सुरैः अमृतं प्राप्तम् अन्यदपि
यद्यत् अभवत् तत् हरेः कर्म वद त्वया कथ्यमानेन हरेर्महिम्ना मे चित्तं न तृप्यति सूत उवाच एवं पृष्टः शुकः हरेर्वीर्यमभ्या
चष्टुं प्रचक्रमे श्रीशुक उवाच यदा युद्धे दैत्यैः पीड्यमानाः देवाः गताः सर्वः निपतिताः संतः न पुनर्जीवंति स्म किंच हे नृप य
दा दुर्वाससः शापात् सेंद्राः त्रयः लोकाः निःश्रीकाः अभवन् तदा यागादिक्रियाः नेशुः ततः महेंद्रवरुणादयः एतत् यज्ञनाशादि-
कं निशम्य स्वयं मंत्रयंतः निश्चयं न प्रापुः ततः मेरुमूर्द्धनि ब्रह्मसभां गत्वा प्रणताः संतः ब्रह्मणे सर्वं विज्ञापयांचक्रुः तदा ब्रह्मा इंद्र
वाय्वादीन् निःसत्वान् दृष्ट्वा असुरांश्च तेजीयसः दृष्ट्वा मनसा हरिं स्मरन् देवानुवाच हे देवाः अहं भवः यूयं मनुष्यादयश्च
एते सर्वे यस्यांशाः तं सर्वे शरणं व्रजाम किंच अयं कालः स्थितिपालनरूपो वर्त्तते अतः तं जगद्गुरुं शरण्यं शरणं व्रजामः श्री
शुक उवाच इति ब्रह्मा सुरान् आभाष्य देवैः सह भगवतः स्थानं जगाम तत्र अदृष्टरूपाय श्रुतपूर्वाय गीर्भिः स्तुतिं अकरोत्
ब्रह्मोवाच हे ईश अविक्रियं सत्यं अनंतं आद्यं गुहाशयं निरुपाधिं अप्रतर्क्यं वचसा अनिरुक्तं देववरं त्वां नमाम किंच य
स्य ते मायां कश्चिदपि नातिक्रामति यया जनो मुह्यति अतः आत्मस्वरूपं न वेद तं परेशं त्वां नमाम हे देव इमे देवाः वयं यस्य तव
सत्वेन सृष्टा अपि निरुपाधि स्वरूपं त्वां न विद्मः रजस्तमोमयाः दैत्याः न विदुरिति किं वक्तव्यम् किंच यस्य पादौ मही रेतः अंभः मनः

श्लो० ८ दुर्वासा हि कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा स्वकंठस्थां मालां तस्मै दत्ता तेन च श्रीमदेन अनादृत्य ऐरावतस्य कुंभयोर्निक्षिप्ता स च गजो तमः पद्भ्यां मालां चूर्णीचकार ततः कुपितो दुर्वासा सं
शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति, श्लो० ४ क्षीराब्धिम्

सोमः मुखम् अग्निः चक्षुः सूर्यः यस्यप्राणात् चराचराणांप्राणः अभूत् यस्यश्रोत्रात् दिशः हृदः इंद्रियाणिनाभ्याः खम् बलात् इंद्रः प्रसा
दाद्देवाः क्रोधाद्रुद्रः बुद्धेर्ब्रह्मा खेभ्यः वेदाः ऋषयश्च शिश्नात् प्रजापतिः श्रीः वक्षसः छायायाः पितरः स्तनात् धर्मः पृष्ठतः अधर्मः शीर्ष्णः
द्यौः विहारादप्सरसः यस्यमुखंविप्रः वेदाश्च यस्यभुजयोः क्षत्रंबलंच यस्यऊर्वोः वैश्यः वार्त्ताच यस्यांघ्रिजः शूद्रः शुश्रूषाच यस्या-
धरात् लोभः ऊर्ध्वोष्ठात् प्रीतिः नासिकायाद्युतिः स्पर्शेनकामः भ्रुवोः यमः पक्ष्मतः कालः एवंभूतः सः नः प्रसीदताम् किंच भूता-
निकालंकर्मगुणान् लौकिकप्रपंचंच यस्ययोगमायाविमोहितान् वदंति सः महाविभूतिः नः प्रसीदताम् एवंभूतः त्वंप्रपन्नानांनः
आत्मानंदर्शय तेअनंतायनिर्गुणायपरेशायसांप्रतंसत्त्वस्थायतुभ्यंनमः ५० इत्यष्टमेपंचमः ५ श्रीशुकउवाच हेरा
जन् सुरगणैः एवंस्तुतः भगवान् सहस्रार्कोदयद्युतिः आविरभूत् ततः शर्वेणसह ब्रह्माऽविर्भूतांतनुंस्वच्छांमरकतश्यामांकंजग
र्भारुणेक्षणांवस्त्राभरणैः युतांमूर्तिमद्भिः सुदर्शनादिभिः उपासितांतां भगवत्तनुं दृष्ट्वासशर्वः ब्रह्मापरंपुरुषंतुष्टाव हेईश अजा
तजन्मस्थितिसंयमायनिर्गुणायअपारमोक्षसुखरूपाय अपरिमितधाम्नेमहानुभावायतुभ्यंनमोनमः हेदेव इदंतवरूपंपूज्य-
म् अमुष्मिन् त्वयिअस्मान् त्रिलोकांश्चसहपश्यामि किंच इदंविश्वंआदिमध्यांतेषुत्वय्येवआसीत् अस्याद्यंतादिस्त्वमेव त्वंवि
श्वंनिर्मायतत्रप्रविष्टोऽसि हेकमलनाभ एवंभूतंत्वांदृष्ट्वाअद्यवयंनिर्वृतिंगताः किंच वयंतेपादमूलंयदर्थंप्राप्ताः तत् त्वंविध-
त्स्व हेअंतरात्मन्नशेषसाक्षिणः तेअन्यैः विज्ञाप्यंकिमस्ति हेईश अहंशिवः सुरादयश्च अग्नेः विस्फुलिंगाइवत्वत्तः वयंपृथक्
विभाताः संतः आत्मनः श्रेयः किंविद्मः अपितुन अतः देवानांद्विजानांच इदंकुरुतेस्वपायमुपदिश श्रीशुकउवाच एवंवि ४
रिंच्यादिभिः ईडितः भगवान् तेषामभिप्रेतंज्ञात्वाबद्धांजलीन् तान् मेघगंभीरयावाचाजगाद श्रीभगवानुवा० हेब्रह्मन् हेशंभो-

हेदेवाःममभाषणंशृणुत वःश्रेयःयथास्यात् यूयंयातवःयावत् वृद्धिःस्यात् तावत्कालानुगृहीतैःदानवदैतेयैः सह संधिर्विधीयताम्
किंच हेदेवाः आदौस्वकार्यार्थगौरवे अरयोऽपिसंधेयाःपश्चात् अहिमूषकवत् वर्तितव्यम् किंच अमृतोत्पादने शीघ्रंयत्नःक्रियता
म् यस्यपीतस्यसतःमृत्युग्रस्तोऽपिजंतुःअमरोभवेत् इतिकर्त्तव्यतामाह हेदेवाःक्षीरोदेवीरुत्तृणलतौषधीःक्षिप्त्वामंदरंमंथानंवा
सुकिंरज्जुंचकृत्वामयासहायेननिर्मथध्वम् एवंकृतेदैत्याःक्लेशभागिनःभविष्यंति यूयंफलभागिनोभविष्यथ असुराःयत्यत्इ
च्छंतितत्तदनुमोदध्वम् हेसुराःसर्वेअर्थाःयथासाममार्गेणसिद्ध्यंतितथासंरंभेणान किंच जलधिभवात्विषात्नभेतव्यम् त
थामथनादुत्पन्नेषुवस्तुषुकामरोषलोभाःनकार्याः श्रीशुकउवाच एवंभगवान्देवानादिश्यअंतर्दधे अथभगवतेनम-
स्कृत्यब्रह्माभवश्चस्वंस्वंधामजग्मतुः ततोदेवाःबलिमुपजग्मुः तदाशस्त्रादिरहितानपिदेवान् दृष्ट्वातथास्वनायकान्जातक्षोभा
न् दृष्ट्वास्तुत्यःदैत्यराट्संधिविग्रहकालवित् दैत्यान्न्यषेधत् देवाःबलिंउपागमन् महेंद्रःबलिंसांत्वयित्वापुरुषोत्तमात्शिक्षितं
अभाषत तत्वचःबलेःअन्येषांशबरारिष्टादीनांचअरोचत ततोदेवासुराःमिथःसमयंकृत्वाअमृतार्थेउद्यमंचक्रुः ततस्तेमंदरगि
रिंउत्पाट्य अब्धिंनिन्युःशक्रवैरोचनादयः तेवोढुंअसमर्थाःश्रांताःसंतःअद्रिंपथिविजहुःसःकनकाचलःतत्रनिपतन् भारेण
देवादीन्चूर्णयामास ततःभग्नमनसःभग्नबाहूऽरुकंधरान् देवासुरान्विज्ञायतत्रगरुडध्वजोभगवान्आविर्भूत्वागिरिपातवि
निष्पिष्टान् अमरादीन्त्रैलोक्यईक्षयाजीवयामास ततःएकहस्तेनगिरिंगरुडेआरोप्यस्वयंचआरुह्यसुरादिभिःसहअब्धिं
ययौ सुपर्णःगिरिंस्कंधात्अवरोप्यजलांतेउत्सृज्यहरिणाप्रस्थापितःययौ ३९ इत्यष्टमेषष्ठः६ तेदेवाःफलभागेननागराजंआ-
मंत्र्यतंगिरौसंवेष्ट्यअमृतार्थंअब्धिंमथितुंआरेभिरे तत्रदेवैःसहहरिःमुखंजगृहे तत् भगवच्चेष्टितंदैत्यपतयःनेच्छन् हेदेवाःस्वाध्या

यश्श्रुतसंपन्नाः जन्मकर्मभिः प्रख्याताः वयं अहेः इदं अमंगलं पुच्छं न गृह्णीमः एवं उक्त्वा तूष्णीं स्थितान् दैत्यान् विलोक्य सामरः हरिः पु-
च्छं जग्राह एवं कृतस्थानविभागास्ते पयोनिधिं ममंथुः एवं अर्णवे मथ्यमाने सति बलिभिर्ध्रियमाणोऽपि अद्रिः अनाधारः सन् गुरुत्वा-
त् अप आविशत् ततः तेस्वपौरुषे नष्टे सति खिन्नाः बभूवुः तदा ईश्वरः विघ्नेशकृतं विघ्नं विलोक्य काच्छपं वपुः कृत्वा तोयं प्रविश्य गिरिं
उज्जहार एवं कृते तं गिरिं उत्थितं वीक्ष्य ते मथितुं पुनः उत्थिताः तदा भगवान् लक्षयोजनविस्तृतपृष्ठेन अद्रिं दधार ततः सुरासुरेंद्राणां
भुजवीर्यकंपितं पृष्ठे भ्रमंतं गिरिं कच्छपः अंगकंडूयनं मेने यदा मथनसमये गिरिः उपर्युपरि अगात् तदा भगवान् अन्यरूपं धृत्वा स-
हस्रबाहुः सन् अद्रिं आक्रम्य ब्रह्मभवेंद्रमुख्यैः स्तुतः गिरौ तस्थौ ततः उपरि अधश्च देवदैत्यमध्ये गोत्रनेत्रयोः प्रविशता परेण ते स-
मेधिताः अब्धिं ममंथुः तदा अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसः दैत्याः अभवन् किंच तच्छ्वासशिखाहतप्रभा-
न् धूम्रांबरस्रक्वरकंचुकाननान् देवांश्च भगवद्वशा घनाः अभ्यवर्षन् वायुः ववौ एवं तैः मथ्यमाने यदा सुधा न जायेत तदा भगवान्
स्वयं ममंथ तदा मेघश्यामः पीतवासाः स्रग्धरः रक्तनेत्रः हरिः दोर्भिः दंदशूकं गृहीत्वा मथ्नन् पर्वत इव अशोभत ततः मथ्यमानात् उ-
दधेः हालाहलाह्वं विषमभूत् तत् उग्रवेगं दिशि दिशि उपर्यधः विसर्पत् असह्यवीर्यं दृष्ट्वा सेश्वराः प्रजाः भीताः सत्यः केनापि अर-
क्ष्यमाणाः शिवं शरणं जग्मुः अद्रौ आसीनं तं विलोक्य स्तुतिभिः प्रणेमुः प्रजापतयऊचुः हे देवदेव हे भूतभावन अस्मात्
त्रैलोक्यदहनात् विषात् नः त्राहि हे ईश सर्वजगतः बंधमोक्षयोः ईश्वरः त्वं एक एव किंच गुह्यं परं ब्रह्म त्वमेव यदा च सर्गादीन् कर्त्तु-
मिच्छसि तदा गुणमय्या स्वशक्त्या ब्रह्मविष्णुशिवाभिधां धत्से हे भगवन् अग्निस्तव मुखम् पृथ्वी पादौ कालो गतिः दिशः कर्णौ ५
वरुणः जिह्वा नभो नाभिः सूर्यश्च क्षूंषि जलं रेतः चंद्रो मनः द्यौः शिरः समुद्राः कुक्षिः पर्वताः अस्थीनि ओषधयो रोमाणि छंदांसि स-

सधातवः सर्वधर्मः हृदयम् हेगिरित्र पंचोपनिषदः तेमुखानि गुणाः नेत्राणि मनुः ईक्षणम् किंच ब्रह्मादीनामपितवज्योतिः अगम्यम्
हे महेश्वर त्वत्तः परं न पश्यामः किंच इयंतेव्यक्तिः लोकस्य सुखाय अतः नः पाहि श्रीशुकउवाच प्रजानांतत्व्यसनंवीक्ष्यशि-
वः देवींआह श्रीमहादेवउवा० हे भवानि कालकूटात् प्राप्तं प्रजानांदुःखं पश्य पश्य प्राणपरीप्सूनां आसांमया अभयंविधेय
म् किंच यद्दीनपरिपालनं एतदेवश्रेष्ठस्य अर्थः साधवस्तु क्षणभंगुरैः स्वप्राणैः जीवान् पांति अतः इदंगरं भुंजे मत्तः प्रजानांस्व-
स्त्यस्तु एवंदेवींस्पृष्ट्वाविषंजग्धुं आरेभे साऽपिप्रभावज्ञा अन्वमोदत ततः विषंकरतलीकृत्य अभक्षयत् ततः विषंतस्यापिवी
र्यंदर्शयामास गलेनीलंचकार तत् साधोः विभूषणंजातम् तत् शंभोः कर्मनिशम्य दाक्षायणी ब्रह्मावैकुंठश्चशशंसिरे विषंपि
बतः तस्य पाणेः यत् गलितंतत् वृश्चिकाहिविषौषध्योदंदशूकाश्चजगृहुः ४६ इत्यष्टमेसप्तमः ७ श्रीशुकउवाच एवंवृ
षांकेण गरे पीते सति देव दैत्याः प्रीताः संतः पुनः तरसा अब्धिं ममंथुः ततः सुरभिः अभवत् तां ऋषयः यज्ञस्यमेध्याय हविषेज
गृहुः ततः चंद्रपांडुरः उच्चैःश्रवानामहयः अभूत् तस्मिन् बलिः स्पृहांचक्रे प्रागेवशिक्षितत्वात् इंद्रः न ततः ऐरावतोनाम चतुर्दंत
युक्तः श्वेतः गजः अभवत् ततः कौस्तुभाख्यंरत्नं अभूत् तस्मिन् हरिः स्पृहांचक्रे ततः पारिजातः कल्पतरुः अभवत् सः स्वर्गवि-
भूषणं अभूत् ततः अप्सरसोजाताः ताः स्वर्गिणांरमण्यः अभवन् ततः भगवत्परा श्रीः रमाजाता तस्यांसुरासुरमानवाः स्पृ-
हांचक्रुः तस्याः आसनं इंद्रः आनिन्ये सरितः हेमकुंभैः जलं आनिन्युः भूमिः अभिषेकोचिताः सर्वौषधीः आहरत् गावः पंचग-
व्यानि आहरन् वसंतः फलपुष्पादि आहरत् ऋषयः अभिषेकं चक्रुः गंधर्वाः जगुः नट्यः ननृतुः देवाः मृदंगादीन् अवादयन् दि
ग्गजाः पूर्णकलशैः अभिषिषिचुः समुद्रः पीतकौशेयवाससीददौ वैजयंतीं मालांददौ विश्वकर्मा विचित्रभूषणानिददौ स

रस्वतीहारंददौ अजःपद्मंददौ नागाःकुंडलेददुः ततःरमानदद्द्विरेफांपद्ममालांपाणिनागृह्य वल्कंचचाल साइतस्ततःविसर्पंती
हेमलतेवबभौ ततःदेवादिषुआत्मनःध्रुवंआश्रयंविलोकयंती नान्वविंदत् तदेवाह यस्यतपःअस्तितस्यक्रोधजयोन
यस्यज्ञानंअस्तितत् संगवर्जितंन कश्चित्महान्तस्यकामजयःन कश्चित्चिरायुःतस्यशीलंमंगलंन यत्रउभयंसःअमंगलः
कश्चित्सुमंगलःसःमांनेच्छति एवंविमृश्यनिरपेक्षमपिसर्वगुणाश्रयंमुकुंदंवव्रे ततःतस्यांसदेशेनवकंजमालांनिधायनि
कटेतस्थौ भगवान्तस्याःस्ववक्षःस्थानंददौ यत्रस्थिताश्रीःसकरुणेनसाधिपान्त्रिलोकान् अवर्धयत् गायतांगंधर्वाणांवा
द्यस्वनःअभूत्पुष्पवर्षणःब्रह्माद्याःविभुंईडिरे श्रियाविलोकितादेवाद्याःसुखंप्रापुःलक्ष्म्याउपेक्षितादैत्याद्याःनिःसत्वाःलो
लुपाःनिर्लज्जाःबभूवुःअथवारुणीदेवीकन्याकमललोचनाआसीत् तांअसुराःजगृहुःअथमथ्यमानात्उदधेःअमृतपूर्णक
लशंबिभ्रत् स्रग्वीअरुणेक्षणःपीतवासाःसिंहविक्रमःविष्णोःअंशःधन्वंतर्याख्यःपुरुषःआयुर्वेददृक्इज्यभाक्सन्उत्थि
तःअसुराःतंअमृतकलशंचदृष्ट्वातंकलशंआहरन् असुरैःकलशेनीयमानेखिन्नाःदेवाःहरिंशरणंययुःभगवान्तेषांदैन्यमा-
लोक्यदैत्यानांमिथःकलहोत्पादनेनमोहिन्या वःअर्थंसाधयिष्यामि यूयंमाखिद्यतइत्याह ततःतेषांअहंपूर्वमहंपूर्वंनत्वंनत्व
मितिमिथःकलहःअभूत् तत्रयेदुर्बलाःतेस्वभागंदेवाःअर्हंतीत्युक्त्वाधृतकलशान्प्रबलान्प्रत्यषेधन् एतस्मिन्नंतरेसर्वोपा
यवित् ईश्वरःअद्भुतंयोषिद्भूतंउत्पलश्यामंस्वकेशभारेणमालांबिभ्रत् सुग्रीवकंठाभरणंलसच्चरणनूपुरम् नवयौवननिर्वृ
त्तस्तनभारकृशोदरंसव्रीडस्मितादिभिःदैत्यचित्तेषुकामंउद्दीपयत् एवंभूतंरूपंदधार४६ इत्यष्टमेअष्टमः८ श्रीशुक
उवाच अथतेसुराःत्यक्तसौहृदाःसंतःअन्योऽन्यतःपात्रंहरंतःआयांतींस्त्रियंददृशुःअहोअस्याःरूपंअहोधामअहोनवं

ओ॰२ दुर्वाससः, ओ॰२ शक्रस्य, ओ॰२ ब्रह्मचंद्रादिः, ओ॰३ मार्कंडेयः, ओ॰३ शिवे, ओ॰४ श्रीमुकुंदः

वयः इति वदंतः जातकामाः संतः तां पप्रच्छुः हे कमलाक्षि का त्वं कुतः आगता किं चिकीर्षसि वयं त्वां अमरादिभिः अस्पृष्टपूर्वां जानीमः
किंच विधिना नः सर्वेंद्रियमनःप्रीतिं विधातुं प्रेषिता असि किम् सा त्वं एकवस्तु निस्पर्धमानानां बद्धवैराणां नः शं विधत्स्व वयं कश्यप-
पुत्राः भ्रातरः अतः नः भेदो यथा न भवेत् तथा सुधां विभजस्व एवं दैत्यैः प्रार्थितः हरिः प्रहस्य इदं आह श्रीभगवानुवाच हे दै-
त्याः यूयं कश्यपसुताः पुंश्चल्यां मयि कथं अनुसृताः पंडितः कामिनीषु विश्वासं न याति हे दैत्याः वृकाणां स्वैरिणीनां स्त्रीणां च सख्या
नि अनित्यान्याहुः श्रीशुक उवाच एवं तस्याः नर्मवाक्यैः मोहिताः संतः जहसुः तस्यै अमृतभाजनं च ददुः ततो हरिः अमृतपा
त्रं गृहीत्वा आह हे दैत्याः मया साधु वा असाधु वा कृतं यदि अंगीकुरुत तर्हि सुधां विभजे एवं तस्याः वाक्यं श्रुत्वा तथेति अमंसत अ
थ ते सर्वे उपोष्य अग्निं हुत्वा दानानि विप्रादिभ्यो दत्वा वासांसि धृत्वा भूषिताः संतः प्रागग्रदर्भेषु प्राविशन् धूपामोदितशालायां
सुरासुरेषु प्राङ्मुखेषूपविष्टेषु सत्सु तस्यां सा मोहिनी अमृतकलशं गृहीत्वा आविवेश विस्रस्तस्तनपट्टिकां तां तां दृष्ट्वा सर्वे मुमु
हुः जात्या क्रूराणां असुराणां सुधादानं अहीनां क्षीरमिव अन्याय्यं मत्वा तेभ्यः सुधां न व्यभजत् एवं देवदैत्यानां पृथक् पंक्तीः कृत्वा
स्वस्वपंक्तिषु तान् उपवेश्य गृहीतकलशः हरिः प्रियवाक्यादिना तान् अतिक्रम्य अतिक्रम्य वंचयन् गमनैः दूरस्थानपि देवान् जरा
मृत्युहरां सुधां पाययामास ततो दैत्याः समयं पालयंतः तस्याः बहुमानेन बद्धाः स्त्रीवादजुगुप्सया विप्रियं किंचिदपि नोचुः तदा रा
हुः देवसंसदि चंद्रार्कयोः मध्ये स्थितः सन् सुधां पपौ ताभ्यां सूचितः हरिः चक्रेण तच्छिरः जहार तत् कबंधस्तु सुधया अस्पृष्टः अ
पतत् शिरस्तु अमरतां नीतं अजः तं ग्रहं अकरोत् यः पर्वणि चंद्रार्कौ अभिधावति एवं देवैः अमृते पीते असुराणां पश्यतां सतां हरिः
स्वस्वरूपं जगृहे एवं सुरासुराः श्रमे तुल्याः अपि फले विकल्पं आपुः हे नृप देवाः यत्पादपंकजरजः श्रयणात् अमृतं आपुः दैत्यान

२९ इत्यष्टमेनवमः ९ श्रीशुकउवाच हेनृपदैतेयाः कर्मणियत्ताः संतः भगवत्पराङ्मुखाः अतएव अमृतंनाविंदन् एवंभ
गवान् देवान् अमृतंसाधयित्वाययौ ततः देवानां परांऋद्धिं दृष्ट्वा दैत्याः गृहीतायुधाः संतः युद्धार्थं ययुः तदा समुद्रतीरे देवासुरोनाम
तुमुलोरणः अभवत् तत्ररणेसपत्नाः अन्योन्यंआसाद्य आयुधैर्जघ्नुः तत्रशंखवादीनांस्वनः अभवत् अथरथिनः रथिभिः पत्तयः
पत्तिभिः हयाः हयैः इभाः इभैश्चरणेअसज्जंत तथाकेचिद्भटाः उष्ट्रेभखरसिंहगृध्रकंकबकशरभमहिषगोवृषशिवाखुकुक्कु-
टबस्तहंससूकरजलस्थलखगादिषु आरूढाः तेष्वारूढैः अन्यैः सहयुयुधुः एवंउभयोःसेनयोर्मध्ये अग्रतोऽग्रतः तेविविशुः तदाचि
त्रध्वजपटातपत्रव्यजनचामरोष्णीषादिभिः देवदैत्यसेनयादोर्भिः सागराविवरेजतुः तत्रअसुराणांपतिः बलिः वैहायसंनामकामगंवि
मानमास्थितः सन् चंद्रइवरेजे तस्यसर्वतः यानैः दैत्याः नमुचिः शंबरः विप्रचित्तिः बाणः रयोमुखः द्विमूर्द्धा कालनाभः प्रहेतिः हेतिः इ
ल्वलः शकुनिः भूतसंतापः वज्रदंष्ट्रः विरोचनः हयग्रीवः शंकुशिराः कपिलः मेघदुंदुभिः तारकः चक्रदृक् शुंभः निशुंभः जंभः उत्क
लः अरिष्टः अरिष्टनेमिः मयः अन्ये पौलोमकालेयनिवातकवचादयः एतेदैत्याः आसन् तथासिंहनादान् मुंचंतः शंखान् दध्मुः ततःश
त्रून् दृष्ट्वा इंद्रः कुपितः सन् ऐरावतारूढः सूर्यइवरेजे तस्यसर्वतः नानावाहध्वजायुधाः वाय्वग्निवरुणादयः देवाः आसन् तेऽन्योऽ
न्यमभिसंसृत्यक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतोऽग्रेयुयुधुर्द्वंद्वयोधिनः १ तत्रबलिः इंद्रेणयुयोध तारकेणगुहः व
रुणः हेतिना मित्रः प्रहेतिना यमः कालनाभेन विश्वकर्मामयेन शंबरः त्वष्ट्रा विरोचनः सवित्रा अपराजितेन नमुचिः अश्वि-
नौवृषपर्वणा सूर्यः बलिसुतैः राहुणासोमः पुलोम्नावायुः निशुंभशुंभाभ्यांदेवी वृषाकपिः जंभेन विभावसुः महिषेण इ-
ल्विलवातापिब्रह्मपुत्रैः कामदेवेनदुर्मर्षः उत्कलः मातृभिः बृहस्पतिः शुक्रेणनरकेणशनिः मरुतः निवातकवचैः कालेयैः ७

वसवः विश्वेदेवाः पौलोमैः रुद्राः क्रोधवशैः युयुधुः त एवं अन्योऽन्यं आसाद्य तीक्ष्णशरासितोमरैः मिथः निजघ्नुः भूमेः रेणुः उत्थितः
तेषां वाहनानां च शिरोरुबाहुभिः आस्तृता भूः बभौ तत्र कबंधाः उत्पेतुः ततः बलिः इंद्रं शरैः १० त्रिभिर्गजं चतुर्भिः गजपादरक्षकान्
एकेन गजयंतारं विव्याध प्राप्तान् शरान् इंद्रः भल्लैः चिच्छेद ततो बलिः शक्तिं आददे तां इंद्रः चिच्छेद ततः बलिः यद्यत् जगृहे तत्त-
दिंद्रः चिच्छेद ततो बलिः अंतर्धाय मायां ससर्ज ततः देवसेनोपरि शैलः प्रादुरभूत् ततः तरवः शिलाः सर्पाः सिंहव्याघ्रादयः उत्पेतुः
यातुधान्यः छिंधि भिंधीति वादिन्यः आसन् मेघाः अंगारकान् मुमुचुः दैत्येन सृजः वन्हिः सांवर्तक इव सैन्यं अदहत् समुद्रः उद्वे-
लः प्रत्यदृश्यत एवं सृष्टासु मायासु इंद्रादयः तत्प्रतिविधिं अजानंतः खिन्नाः संतः हरिं दध्युः तदा हरिः अष्टबाहुः गरुडारूढः प्रादुर-
भूत् तदैव मायाः विनेशुः एवं हरेः स्मृतिः सर्वविपद्विमोक्षणे भवति कालनेमिः युद्धे हरिं दृष्ट्वा शूलं चिक्षेप तदा गरुडमूर्ध्नि पतत्
तत् हरिः गृहीत्वा तेनैव सगजं अरिं अहनत् ततः मालीसुमाली चक्रेण कृत्तशिरसौ पेततुः अथ माल्यवान् गदया गरुडं निहत्य-
हरिं हंतुं गदां जगृहे तावत् सः तच्छिरः चक्रेण चिच्छेद ५७ इत्यष्टमे दशमः १० श्रीशुक उवाच अथो देवाः हरेः कृपया दै-
त्यान् निजघ्नुः किंच यदा इंद्रः बलिं हंतुं वज्रं जगृहे तदा प्रजाः हाहेति चुक्रुशुः युद्धे इंद्रः बलिं आह हे मूढ मायाभिः मायेशान् नः जे-
तुमिच्छसि किंच मायाभिः ये दिवं आरोढुमिच्छंति तान् दस्यून् पूर्वपदात् अधः पातयामि हे मंदात्मन् अहं वज्रेण ते शिरः हरिष्ये
ज्ञातिभिः सह यत्नं कुरु बलिरुवाच मृधे वर्तमानानां कीर्तिः जयः पराजयः मृत्युः वा क्रमात् स्यात् एतत् सर्वं सूरयः काला-
धीनं पश्यंति एवं विवेके यूयं अज्ञाः स्थ अतः युष्मद्गिरः न गृह्णीमः श्रीशुक उवाच एवं बलिः इंद्रं विनिंद्य तं बाणैः अहनत्
तदा इंद्रः तस्मै वज्रं प्राहरत् ततः बलिः सयानः भूमौ पपात बलिं पतितं दृष्ट्वा जंभः सिंहारूढः सन् गदां उद्यम्य शक्रं जत्रौ गजं च अ-

ताडयत् ततोगजः जानुभ्यां भुवंस्पृष्ट्वा कश्मलंययौ ततः मातलिना सहस्राश्वैर्युक्तः रथः आनीतः इंद्रः रथंआरुरुहे तदा यंतुः
कर्म अपूजयत् दानवः शूलेन मातलिं अहनत् सः धैर्यं धृत्वा रुजंसेहे तदैव इंद्रः जंभशिरः वज्रेण अहरत् नारदात् जंभंहतंश्रुत्वा
नमुचिः बलः पाकः इतित्रयः प्राप्ताः ते इंद्रं शरैः अवाकिरन् तत्र बलः सहस्रशरैः इंद्राश्वान् पाकः शताभ्याम् २०० मातलिंनमुचिः
पंचदशबाणैः इंद्रंविध्वामेघइवव्यनदत् ततोदैत्याः सरथंइंद्रंशरैः छादयामासुः तदादेवाः विचुक्रुशुः ततः इंद्रः इषुबद्धपंजरात्
निर्गतः सूर्यइवबभौ ततः दैत्यैः अर्द्दितांसेनां वीक्ष्य रिपुंहंतुं वज्रंगृहीत्वा बलपाकयोः शिरसी वज्रेण जहार नमुचिः तद्वधंदृष्ट्वा
इंद्रं हंतुं शूलं प्रगृह्य हतोऽसिहतोसीतिवदन् विसर्जयत् तत्शूलंइंद्रः इषुभिः सहस्रधाचिच्छेद अथइंद्रः वज्रेण तंकंधरे अहन
त् तस्यत्वचमपिवज्रः नबिभेद तन्महदद्भुतं अभूत् तदा शत्रोः भीतः इंद्रः इदंआह मया अनेन वज्रेण पर्वतपक्षाः छिन्नाः वृत्र-
श्चहतः सोऽ यंमेवज्रः अल्पके असुरे व्यर्थोजातः तस्मात् वज्रंनाहमाददे अहो दधीचेः सामर्थ्यमपि अकारणंजातम् एवंवि
षीदंतं शक्रं अशरीरिणी वागाह हे इंद्र अयंदैत्यः शुष्कैः आर्द्रैश्च वधं नार्हति एवंमया अस्मै आर्द्रशुष्काभ्यां मृत्युर्नैवेतिवरोद-
त्तः अतः अन्यउपायः चिंत्यः तांगिरंश्रुत्वा उभयात्मकंउपायं अपांफेनंज्ञात्वा तेन इंद्रः नमुचेः शिरः जहार तदा मुनयः तुष्टुवुः पु
ष्पैश्च अवाकिरन् दुंदुभयोनेदुः नर्तक्यः ननृतुः ततः वाय्वग्निवरुणादयः अस्त्रौघैः दैत्यान् सूदयामासुः तदैव ब्रह्मणा प्रेषितः नारदः
एत्य दैत्यक्षयं दृष्ट्वा देवान् वारयामास हे देवाः नारायणभुजाश्रयैः भवद्भिः अमृतं प्राप्तं श्रिया च समेधिताः अतः विग्रहात् उपारमत ए
वंमुनेर्वचः मानयंतः देवाः अनुचरैः सह स्वर्गं ययुः ततः युद्धे अवशिष्टाये दैत्याः ते नारदानुमतेन विपन्नं बलिं आदाय अस्तंगिरिंउपाग
मन् तत्र शुक्रः अविनष्टावयवान् तान् संजीविन्या विद्यया जीवयामास एवं शुक्रेण स्पृष्टः बलिः पुनः प्राप्तेंद्रियस्मृतिः पराजितोऽपिना

रिवद्यत् ४८ इत्यष्टमेएकादशः ११ श्रीशुकउवाच हरिःयोषिद्रूपेणदैत्यान् संमोह्य देवान् सोमं अपाययत् इदंश्रुत्वा-
शिवः देव्यासह वृषंआरुह्य यत्र हरिः आस्तेतत्रययौ भगवतासत्कृतः शिवः उपविष्टः सन् हरिं प्रति पूज्य इदं आह शिव-
उवाच हेदेवदेव हेजगदीशसर्वभावानांत्वंहेतुः आत्माअसि अस्यजगतः आद्यंतौमध्यंच यतः भवंतितच्चिद्रूपंब्रह्मैव भ-
वान् किंच मुनयः संगंत्यक्त्वातवैवचरणांबुजं उपासते वेदांतिनः त्वांब्रह्ममन्यंते मीमांसकास्त्वां धर्मं मन्यंते इत्यादि किंच त्वद्र-
चितंविश्वंअस्मदादयः नजानंति अन्येदैत्यादयः नेतिकिम् एवंस्तुत्वाविज्ञापयति हेहरे गुणैः रममाणस्यते मयाबहवः अवता-
राः दृष्टाः सोऽहं तवयोषिद्रूपंद्रष्टुंइच्छामि येनदैत्याः मोहिताः सुराः अमृतं पायिताः तद्रूपंदर्शय परंनः कौतूहलमस्ति श्री
शुकउवाच एवंप्रार्थितः विष्णुः प्रहस्यशिवंअभाषत श्रीभगवानुवाच हेशिवदैत्यानांकौतूहलाय अमृत पात्रे
गते सति देव कार्यार्थं योषिद्वेषः कृतः तद्रूपंते दर्शयिष्यामि श्रीशुकउवाच भगवान् इत्युक्त्वाअंतरधीयत ततोभवः
सर्वतश्चक्षुश्चारयन् देव्यासह आस्ते अथविचित्रपुष्पारुणपल्लवद्रुमे उपवने कंदुकलीलयाक्रीडंतींश्लथदुकूलांच्युतकबरीं
वामकरेणसन्नह्यंतीं अन्येनकंदुकं विघ्नंतींजगन्मोहयंतींतांवीक्ष्य भवः तत्प्रेक्षणेनविह्वलः सन् अंतिकस्थांउमां स्वगणांश्चन
वेद तस्याः करात् कंदुकः यदादूरं गतः तदानुव्रजंत्याः तस्याः ससूत्रंवासः मारुतः अहरत् एवंभवः तांदृष्ट्वातस्यांरंतुं मनश्चक्रे त-
तः तत्कृतस्मरविह्वलः शिवः देव्याः पश्यंत्याः तत्समीपंययौ तदासातंविलोक्यविवस्त्रालज्जयावृक्षेषुनिलीयमानानान्वतिष्ठ-
त् भवः तां अन्वगच्छत् कामवशंनीतः तांअनुव्रज्य अनिच्छंतींस्त्रियंकेशबंधेगृहीत्वापरिषस्वजे आलिंगितासाइतस्ततःप्र
सर्पंतीतद्भुजात् आत्मानंमोचयित्वाप्राद्रवत् तांअनुधावतःशिवस्यरेतःपपात तद्रेतःमह्यांयत्रयत्र अपतत्तत् रूप्यस्यहे

न्नश्च क्षेत्राणि आसन् रेतसि स्कन्ने सति शिवः आत्मानं मायया जडीकृतम् अपश्यत् ततो मोहात् न्यवर्तत एवं अवगत महात्म्यः
शिवः विष्णोः मायाजडीकरणं अद्भुतं न मेने ततो भगवान् स्वतनुं बिभ्रत् प्रीतः सन् शिवं आह हे देव मया स्वमायया मोहितोऽपि
त्वं स्वां प्रकृतिं स्थितः एतत् दिष्ट्या मे मायां त्वद् ऋते को नु पुमान् अतितरेत् सेयं मे माया त्वां नाभिभविष्यति श्रीशुकउवाच
एवं भगवता सत्कृतः शिवः तं आमंत्र्य परिक्रम्य स्वालयं ययौ ततो भवः भवानीं ऋषीणां मध्ये इदं सर्वं आह अपि त्वं अज
स्य मायां व्यपश्यः अहं श्रेष्ठोऽपि यया विमुह्ये अन्ये अस्वतंत्राः किमुत श्रीशुकउवाच हे नृप एवं ते हरेः विक्रमः उक्तः
इदं उत्तमश्लोकगुणानुवर्णनं शृण्वतः कीर्तयतः पुंसः उद्यमो न नश्यति एवं कपटस्त्रीवेषः दैत्यान् मोहयन् सन् अंघ्रिं प्रपन्नान्
देवान् अमृतं अभोजयत् तं कामपूरं नतोऽस्मि ४७ इत्यष्टमे द्वादशः १२ श्रीशुकउवा॰ अथ विवस्वतः पुत्रः श्राद्धदेवः सप्तमो मनुः त
दपत्यानि मत्तः शृणु इक्ष्वाकुः नभगः धृष्टः शर्यातिः नरिष्यंतः नाभागः दिष्टः करूषः पृषध्रः वसुमान् एते तत्सुताः आदित्याः व
सवः रुद्राः विश्वेदेवाः मरुद्गणा अश्विनौ ऋभवः एते देवाः पुरंदरः इंद्रः कश्यपाद्याः सप्तर्षयः कश्यपाद् दित्यां वामनावतारः
एवं सप्त मन्वंतराणि उक्तानि भाव्यानि वक्ष्ये विवस्वतः मनोः द्वे भार्ये छाया १ संज्ञा चेति २ तृतीया वडवा यमः यमी श्राद्ध-
देवः एते त्रयः संज्ञासुताः सावर्णिः तपती शनैश्चरः एतानि छायापत्यानि अश्विनौ वडवासुतौ अष्टमेंऽतरे सावर्णिः मनुर्भ-
विष्यति निर्मोकविरस्काद्याः तत्सुताः सुतपसः विरजाः अमृतप्रभाः एते देवाः बलिः इंद्रो भविष्यति यः सप्तमेंऽतरे पदत्रयं
याचमानाय विष्णवे महीं दत्वा अष्टमेंऽतरे विष्णोः प्रसादेन लब्धं इंद्रपदं हित्वा ततः सिद्धिं प्राप्स्यति सः अधुना सुतले आस्ते
गालवः दीप्तिमान् परशुरामः अश्वत्थामा कृपः ऋश्यशृंगः व्यासः एते ७ ऋषयः सार्वभौमः अवतारः सः इंद्रात् स्वर्गं हृत्वा-

ओ॰५ हसवत्यसि, ओ॰१ नाम्ना॰

बलयेदास्यामि अथदक्षसावर्णिः नवमोमनुः भूतकेतुः दीप्तिकेत्वादयः पुत्राः पारमरीचिगर्भाद्याः देवाः अद्भुतः इंद्रः द्युतिमत् प्रमुखाः ऋषयः आयुष्मतः अंबुधारायां पत्न्यां ऋषभावतारः येन राद्धांत्रिलोकीं अद्भुतनामा इंद्रः भोक्ष्यति अथ ब्रह्मसावर्णिः दशमो मनुः भूरिषेणाद्याः तत्सुताः हविष्मान् सुकृतः सत्यः जयः मूर्तिः एते ऋषयः सुवासनविरुद्धाद्याः देवाः शंभुः इंद्रः विष्वक्सेनः अवतारः सः शंभोः सख्यं करिष्यति एकादशः मनुः धर्मसावर्णिः सत्यधर्मादयः १० तत्सुताः विहंगमाः कामगमाः निर्माणरुचयो देवाः वैधृतिः इंद्रः अरुणादयः ऋषयः धर्मसेतुरवतारः सः त्रिलोकीं धारयिष्यति द्वादशो मनुः रुद्रसावर्णिः देववान् उपदेवः देवश्रेष्ठादयः तत्सुताः ऋतधामा इंद्रः हरितादयो देवाः आग्नीध्रकादयः ऋषयः स्वधामाख्यः अवतारः त्रयोदशो मनुः देवसावर्णिः चित्रसेनविचित्राद्याः तत्सुताः सुकर्मसुत्रामसंज्ञाः देवाः दिवस्पतिरिंद्रः निर्मोकतत्त्वदर्शाद्याः ऋषयः योगेश्वरः अवतारः चतुर्दशो मनुः इंद्रसावर्णिः उरुगंभीरबुध्याद्याः तत्सुताः पवित्राश्चाक्षुषाः देवाः शुचिरिंद्रः अग्निर्बाहुः शुचिः शुद्धः मागधाद्याः ऋषयः बृहद्भानुरवतारः सः कर्मसंततीर्विस्तारयिष्यति हे राजन् एतानि मन्वंतराणि १४ एभिर्युगसहस्रप्रमाणः कल्पो मितः ३६ इत्यष्टमे त्रयोदशः १३ राजोवाच हे भगवन् मन्वंतरेषु इमे मन्वादयः यस्मिन् कर्मणि येन वियुक्ताः संतः यत्कुर्वंति तद्वद ऋषिरुवाच मनवः मनुपुत्राः मुनयः इंद्राः सुरगणाः एते सर्वे यज्ञाद्यवतारैः प्रचोदिताः संतः जगद्यात्रां नयंति तेषां कर्माण्याह चतुर्युगांते कालग्रस्तान् वेदान् ऋषयः तपसा अपश्यन् ततो मनवः चतुष्पादं धर्मं मत्यां प्रवर्त्तयंति मनुपुत्राः तं धर्मं पालयंति देवाः यज्ञभागान् भुंजंति इंद्रः भगवद्दत्तां श्रियं भुंजानः सन् त्रिलोकान् पांति लोके प्रवर्षति सिद्धरूपधृक् हरिः अनुयुगं ज्ञानं ब्रूते ऋषिरूपधरः हरिः कर्म ब्रूते योगरूपधृक् हरिः योगं ब्रूते प्रजेशरूपेण सर्गं करोति राजमूर्तिः

अ०१२ सनकादिरूपधृक् १ याज्ञवल्क्यादिरूपधरः, दत्तात्रेयादिरूपधृक्, मरीच्यादिरूपेण

सन् दस्यून् हन्यान् कालरूपेण सर्वेषांनाशाय भवति माययामोहितात्मभिर्जनैः नानाशास्त्रैः स्तूयमानोऽपिनैव दृश्यते एतत् अवां
तर कल्पस्य प्रमाणंते कीर्तितम् यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ११ इत्यष्टमे चतुर्दशः १४ राजोवाच ईश्वरः कृपणवत्
भूत्वा बलेः सकाशाद्भूमेः पदत्रयं कस्मादयाचत किंच लब्धार्थोऽपि हरिः कस्मात्तं बबंध एतद्वेदितुमिच्छामः श्रीशुकउवाच

हे राजन् युद्धे इंद्रेण पराजितश्रीः बलिः भृगुभिः जीवितः सन् पश्चात्तान् सर्वात्मना अभजत् ततः प्रसन्नाः भृगवः स्वर्गंजिगी
षमाणं तं बलिं विश्वजिता यागेन अयाजयन् ततः हविर्भिः रिष्टात् हुताशनात् कांचन पट्टनद्धः रथः इंद्राश्ववत् अश्वाः सिंहांकित
ध्वजः धनुः तूणौ कवचंच आस अथ प्रह्लादः तस्मै अम्लानपुष्पांमालां शुक्रः शंखंच ददौ एवंविधैः संपादित युद्ध परिकरो बलिः
तान् प्रदक्षिणीकृत्य प्रणम्य प्रह्लादं पृष्ट्वा नमश्चकार ततः महारथो बलिः शस्त्रालंकारादि धृत्वा भृगुदत्तं रथं आरुह्य धिष्ण्य
स्थः अग्निरिव शुशुभे अथ तुल्यैश्वर्य बलश्रीभिः दैत्ययूथपैः वृतः सन् महतीं आसुरीं सेनां विकर्षन् अति समृद्धां इंद्रपुरीं ययौ
किंभूतां तां उपवनोद्यानैः चंदनादिभिः रम्यां परिखभूतया आकाशगंगया वृतां रुक्मपट्ट कपाटैः द्वारैः जुष्टां सभाचत्वर र-
थ्याढ्यां न्यर्बुदविमानैर्युताम् यस्यां स्वलंकृताः निर्मलवाससः नार्यः भ्राजंते ताम् किंच यस्यां देवस्त्रीकेशच्युतानां स्त्रजां आ
मोद मादाय मार्गे वायुर्वाति ताम् शिखंडिपारावत भृंगनादितां मृदंग शंखादिस्वनैः गंधर्वादीनां गीतैश्च मनोरमाम् यां पुरीं अ
धर्मिष्ठाः खलाः भूतद्रुहादयश्च न व्रजंति इत्यादि विशिष्टां तां देवधानीं गत्वा सेनया रुरुधे ततः भृगुदत्तं शंखं इंद्रस्त्रीणां भयं ज
नयन् सन् दध्मौ अथ इंद्रः बलेः परमं उद्यमं अभिप्रेत्य सर्वदेवगणोपेतः गुरुमुवाच हे भगवन् पूर्ववैरिणः बलेः भूयान् अयं उद्य-
मः अतः इदं अविषह्यं मन्ये इदं केन हेतुना अद्भुत प्रवाहादि सर्वं जातम् एतस्य कारणं ब्रूहि गुरुरुवाच हे मघवन् ते शत्रोः उ-

न्नतेः कारणंजानामि अस्मैशिष्याय भृगुभिः तेजःसंचितम् भवद्विधः भवान् वा अपि अस्यपुरतः स्थातुं ईश्वरंविनानकोपिसमर्थः कृतांतस्ययथाजनाः अतः हेदेवाः यूयं स्वर्गंहित्वा कालंप्रतीक्षंतः अदर्शनंयात अधुनाअयंबलिः विप्रबलोदर्कोस्तिकालेन एषा-मेव अपमानात् सानुबंधः नंक्ष्यति एवंगुरुणासुमंत्रितार्थाः देवाः स्वर्गंहित्वा कामरूपिणः संतः जग्मुः देवेषुलीनेषु सत्सुबलिः देवधानींआस्थायजगत्त्रयंवशंनिन्ये अथभृगवः विश्वजयिनंशिष्यंहयमेधानांशतेन इंद्रपदंस्थिरीकर्तुम् अयाजयन् तदनुभावे-न त्रैलोक्यविश्रुतांकीर्तिंदिक्षुवितन्वानः सन् उडुराडिवरेजे ततोबलिः आत्मानंकृतकृत्यमिवमन्वानः ब्राह्मणैः संपादितांसमृद्धांश्रि-यंबुभुजे २६ इत्यष्टमेपंचदशः १५ श्रीशुकउवाच एवंपुत्रेषुनष्टेषु दैत्यैश्चस्वर्गेहृते सतिदेवमाताअदितिः अनाथवत् पर्य-तप्यत् एकदाकश्यपः तस्याः निरुत्सवंनिरानंदं आश्रमंअगात् कृतासनपरिग्रहः सः दीनवदनांपत्नींइदंआह हेभद्रे अधुनाविप्रा-णांधर्मस्य अभद्रंनागतंकिम् किंवात्रिवर्गस्य अकुशलंकिम् अपिवा अतिथयः त्वद्गृहंएत्यत्वयाअपूजिताः संतः गताः किम् किं-वावेलायांअग्नयोनहुताः किम् अथवा तेसर्वेपुत्राः कुशलिनः अहं भवत्याः मनः अस्वस्थंलक्षये अदितिरुवाच हेब्रह्मन् द्विजगवांधर्मस्यचभद्रमस्ति तवअनुज्ञानाद्धेतोः अग्नयोऽतिथयइत्यादिसर्वंनहीयते किंच भवान् एवंधर्मान् यस्याः प्रभाषते-तस्याः कामः कोनुनसंपद्यते हेमारीच तवैव सर्वाः इमाः प्रजाः तासुत्वंसमः असि तथापि ईश्वरः भक्तंभजते अतएव हेस्वामिन् भजं-त्याः मेश्रेयश्चिंतय सपत्नैः हृतश्रियः हृतस्थानान्नः पाहि किंच प्रबलैर्दैत्यैः ऐश्वर्यादीनिहृतानितानि मेपुत्राः यथापुनः प्रपद्येर-न् तथामेकल्याणंकुरु श्रीशुकउवाच एवंप्रार्थितः कः तांआह अहो स्नेहबद्धंजगत् इदंविष्णोर्मायाबलं किंच अयं-भौतिकः देहः क्वप्रकृतेः परः आत्मा क्व कस्यकेपतिपुत्राद्याः अत्रमोहएवकारणम् अतः जनार्दनंवासुदेवंउपतिष्ठस्व सः नेका-

मान् विधास्यति यतः भगवद्भक्तिः अमोघा न अदितिरुवाच हे ब्रह्मन् केन विधिना जगत्पतिं उपस्थास्ये पुत्रैः सह सी
दंत्याः मे मनोरथं यथाविदध्यात् तथा तत्सेवाप्रकारं आदिश कश्यप उवाच प्रजाकामेन मया पृष्टः ब्रह्मा यत् व्रतं आह तत्
ते वक्ष्यामि फाल्गुनस्य शुक्लपक्षे द्वादशाहं पयोव्रतः सन् हरिं अर्चयेत् सिनीवाल्यां क्रोडविदीर्णया मृदा अंगं लिप्य प्रवाहे स्नायात्
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय इमं मंत्रं मृल्लेपने उच्चारयेत् ततः नित्यनैमि
त्तिकं कर्म कृत्वा प्रतिमादिषु देवं अर्चयेत् नमस्तुभ्यं भगवते पुरुषाय महीयसे सर्वभूतनिवासाय वासुदेवाय साक्षिणे प्रधान
पुरुषाय यज्ञाय शिवाय हिरण्यगर्भाय नारायणाय पीतवाससे केशवाय नमः हे ईश त्वं पुंसां सर्ववरदः अतो धीरास्तव पादरेणु
मुपासते इत्यादिमंत्रैः द्वादशाक्षरविद्यया चहृषीकेशं आवाहनपाद्यादिभिः अर्चयेत् ततः पयसा स्नापयित्वा वस्त्राद्युपचारैः
अर्चयेत् ततः ससर्पिः सगुडं पायसं नैवेद्यं दत्वा मूलविद्यया जुहुयात् निवेदितं तद्भक्ताय दद्यात् स्वयं वा भुंजीत ततः आचमनं द
त्वा तांबूलं निवेद्य अष्टोत्तरशतं मंत्रं जपेत् स्तुतिभिः प्रभुं स्तुत्वा प्रदक्षिणानमस्कारं कृत्वा निर्माल्यं शिरसि धृत्वा देवं विसर्जये
त् पायसेन द्व्यवरान् विप्रान् भोजयेत् ततः बंधुभिः सह भुंजीत इदं व्रतं पयोभक्षः सन् द्वादशाहं कुर्यात् शुक्लप्रतिपदारभ्य त्र
योदश्यंतं हरेः आराधनं होमं अर्हणं द्विजतर्पणं ब्रह्मचर्यादिनियमान् आचरेत् त्रयोदश्यां पंचामृतैः स्नाप्य विष्णोः महापूजां-
कृत्वा चरुं निरूप्य तेन पुरुषं दृष्ट्वा पुरुषतुष्टिदं नैवेद्यं दत्वा आचार्यादीन् वस्त्रादिना प्रतोष्य अन्यांश्च ब्राह्मणान् भोजयेत् ततः
गुरवे ऋत्विग्भ्यश्च दक्षिणां दत्वा अन्नादिना आश्वपाकादीन् प्रीणयेत् ततः बंधुभिः सह स्वयं भुंजीत नृत्यादिभिः प्रत्यहं भग

वतः पूजां कारयेत् एतत् पयोव्रतं मे पितामहेनोक्तं तत् ते कथितम् हे महाभागे त्वं अनेन केशवं भज येन हरिः तुष्यति तदेव तपो

नियमःदि अतःश्रद्धया इदंव्रत माचर अनेनतुष्टः भगवान् तववरान् आशुविधास्यति ६२ इत्यष्टमेषोडशः१६ श्रीशुकउवा
च हंत [illegible] एवंकश्यपेन उक्ता अदितिः मनसाइंद्रियदुष्टाश्वान् निगृह्य एकाग्रबुध्या ईश्वरंचिंतयतीसतीमनः वासुदेवेसमाधा
यपयोव्रतंचचार हेतात तस्मात् व्रतात् भगवान् पीतवासाः चतुर्भुजः शंखचक्रगदाधरः प्रादुरभूत् तंवीक्ष्य भुविकायेनदंडवत्
ननाम ततःसाउत्थाय बद्धांजलिःस्थिता सती स्तोतुंनोत्सहे पश्चात् गद्गदयागिराहरिंतुष्टाव अदितिरुवाच हेयज्ञेशहेयज्ञ
पुरुषनःशंकुरु त्वंदीननाथोऽसिजगतःजन्मस्थितिसंयमार्थं गृहीतमायागुणाय हरयेतेनमोस्तु हेअनंत संतुष्टात्त्वत्तः नृणां-
ब्रह्मायुः इष्टवपुः इत्यादिसर्वंभवति शत्रुजयाद्याशीःकिमुत श्रीशुकउवाच एवंअदित्यास्तुतः हरिः उवाच हेदे
वमातः भवत्याश्चिरकांक्षितंयत् तत् मयाविज्ञातम् किंच युद्धे दैत्यान् निर्जित्य प्राप्तजयश्रीभिः पुत्रैः सह एकत्र स्थातुं इच्छ-
सि तथाइंद्रमुख्यैः देवैः युधिहतानां विद्विषांदुःखिताः रुदंतीःस्त्रियः द्रष्टुमिच्छसि तथास्वर्गंअधिष्ठाय क्रीडतः स्वपुत्रान् द्र
ष्टुमिच्छसि हेदेविते दैत्याः अधुनाअनतिक्रमणीयाः तत्रविक्रमः सुखंनददाति एवंममनमतिः अथापिमयाउपायश्चिंत्यः यतः
तेव्रतचर्यया तुष्टस्य मम अर्चनंअन्यथागंतुंनार्हति हेमातः यतःत्वया अपत्यगुप्तये व्रतेन अर्चितः अहंकश्यपतपसिस्थितः
सन् स्वांशेन पुत्रत्वंएत्य त वसुतान् गोप्तास्मि हेदेविपत्यौमांभावयतीसती पतिंभजस्व एतत् अन्यस्मैनाख्येयम् अनेनसर्वं
सिध्यति श्रीशुकउवाच इत्युक्त्वा भगवान् अंतर्दधे अथदितिः आत्मनिदुर्लभं जन्मलब्ध्वा पतिंअभजत् कश्य
पः समाधियोगेन आत्मनिरहेः प्रविष्टंअंशंज्ञात्वा अदित्यांवीर्यंआधत्त अनिलःदारुणि अग्निंयथा ततोब्रह्मा अदितेः गर्भंअ
धिष्ठायस्थि तंहरिंविज्ञाय गुह्यनामभिस्तुष्टाव हेभगवन् त्वंजय ब्रह्मण्यदेवाय पृश्निगर्भाय विष्णवेतेनमः त्वंदेवानांपरमा

यनं असि एवंभूतस्यतेजन्मादिनास्ति अथापिदेवादीनां कार्यसाधनाय अयमवतारः अतः स्वर्गच्च्युतान् देवान् पुनः स्वर्गेस्थाप
य २८ इत्यष्टमेसप्तदशः १७ श्रीशुकउवाच एवंब्रह्मणास्तुतः भगवान् चतुर्भुजः शंखगदाब्जचक्रः पीतवासाः श्रीवत्स
वक्षाः वनमालयायुतः कंठनिविष्टकौस्तुभः हरिः प्रादुरभूत् तदादिशः प्रसेदुः सलिलाशयाः प्रजाश्च प्रहृष्टाः द्यौः अंतरिक्षं क्षि
तिः देवाः गावः द्विजाः पर्वता जहृषुः हरेः प्रादुरभावसमयमाह श्रवणद्वादश्यां श्रवणस्थे चंद्रे अभिजिन्नक्षत्रे प्रभुः प्रादुर्बभूव स
र्वे नक्षत्रग्रहाः जन्ममुहूर्त्ते बहुगुणाः बभूवुः यस्यां द्वादश्यां हरेर्जन्मजातं तस्यां मध्यंदिनंगतः सूर्यः आसीत् विजयानामसा प्रोक्ता
तदा शंखादयो नेदुः वाद्यनादः अभूत् अप्सरसः ननृतुः गंधर्वाः जगुः मुनयः तुष्टुवुः देवादयः अदित्याश्रमपदं कुसुमैः अवाकिरन्
अदितिः तं दृष्ट्वा मुदं आप कश्यपः जयइत्याह हरिः यद्वपुः पूर्वं दधार तेनवपुषा पित्रोः पश्यतोरेव वामनोबटुर्बभूव ऋषयः बटुं दृ-
ष्ट्वा कश्यपं पुरस्कृत्य कर्माणि कारयामासुः उपनीयमानस्य तस्य वामनस्य सूर्यः सावित्रीं अब्रवीत् बृहस्पतिः ब्रह्मसूत्रम् कश्य
पः मेखलाम् भूमिः अजिनम् सोमः दंडम् माता कौपीनम् द्यौः छत्रम् ब्रह्मा कमंडलुम् सप्तर्षयः कुशान् सरस्वती अक्षमालाम्
कुबेरः भिक्षापात्रीम् उमाभिक्षां ददौ एवं बटुः वामनः ब्रह्मवर्चसेन अरोचत ततः बटुः वन्हिं समिध्य परिसमुह्य परिस्तीर्या
भ्यर्च्य समिद्भिः अजुहोत् एनर्हि अश्वमेधैर्यजंतं बलिं श्रुत्वा तत्र जगाम ततः नर्मदोत्तरतीरे भृगुकच्छक्षेत्रे यज्ञं प्रवर्तयंतः भृग
वः रविमिव भास्वरं तं दृष्ट्वा व्यतर्कयन् अहो क्रतुदिदृक्षया सूर्यः अग्निः सनत्कुमारो वा आयाति किम् एवं भृगुषु वितर्कयत्सु वाम
नः हयमेधपंडपं विवेश भृगवः तं वामनं जटिलं मौंजीमेखलायुक्तं वीक्ष्य उत्थाय अग्निभिः सह प्रत्यगृण्हन् यजमानो बलिस्त- १२
स्मै बटवे आसनं दत्वा स्वागतेन अभिवंद्य तत्पादौ अवनिज्य आनर्च जन्मकल्मषापहं तत् पादशौचं गंगारूपं मूर्ध्नि धृत्वाऽह हे-

ब्रह्मन् ते स्वागतं तुभ्यं नमः तव किंकर वाम अद्य नः पितरः तृप्ताः कुलंच पावितम् अयं क्रतुः स्विष्टः यतः त्वं गृहान् आगतः अद्य मे अग्नयः सुहुताः त्वत्पदैः मे भूमिः पवित्रीकृता हे बटो यद्वांछसि तत् मे मत्तः गृहाण त्वां अर्थिनं तर्कये गां कांचनं गुणवद्धाम अन्नं पेयं कन्यां ग्रामान् तुरग गज रथान् इदं सर्वं हे साधो मत्तः गृहाण ३२ इत्यष्टमे अष्टादशः १८ श्रीशुक उवाच एवं धर्मयुक्तं बलेर्वाक्यं श्रुत्वा प्रीतः वामनः इदं आह हे जनदेव एतत् तव वचः कुलोचितं सूनृतं धर्मयुक्तं चास्ति अस्मिन् कुले कश्चित् कृपणः निःसत्त्वः न ब्राह्मणाय ददामीत्युक्त्वा प्रत्याख्याता पिन किंच दानकाले युद्धे च अर्थिना अर्थिताः त्वत्कुलजाः पराङ्मुखाः न यत्र प्रह्लादः यशसा चंद्र इव रेजे यत्र जातो हिरण्याक्षः दिग्विजये प्रतियोद्धारं नाविंदत यं निर्जित्य विष्णुः तद्वीर्यं स्मरन् नात्मानं जयिनं मेने ततः हिरण्यकशिपुः भ्रातृवधं श्रुत्वा हरेः निलयं जगाम आयांतं दैत्यं आलोक्य विष्णुः चिंतयामास यतो यतोऽहं तत्रान्तः सौ मृत्युः अतोऽस्य हृदयं प्रवेक्ष्यामि एवं निश्चित्य रिपोः शरीरं विवेश दैत्यः तत्र हरिम पश्यन् क्रुद्धः ननाद ततः क्ष्मादिषु विष्णुं विचिन्वन् न ददर्श एवमपश्यन्नाह मे भ्रातृहा विष्णुः यतः पुमान्नावर्तते न द्रष्टुं लोकं गतः किंच ते पिता विरोचनः द्विजैर्याचितः सन् द्विजलिंगेभ्यो देवेभ्यः स्वमायुरदात् हे बले एवंभूत कुलोत्पन्नात् त्वत्तः ईषत् महीं मम पदातुल्यानि त्रिपदानि वृणे वदान्यात् त्वत्तः नान्यत् कामये यावदर्थ परिग्रहः विद्वानेनः न प्राप्नोति बलिरुवाच अहो ब्राह्मणपुत्र त्वं बालः स्वार्थे प्रत्यबुधः असि द्वीपदातारं मां वचोभिः आराध्य यः पदत्रयं वृणीते सः अबुधः यतः पुमान् मां उपव्रज्य पुनर्याचितुं नार्हति तस्माद्धे बटो वृत्तिकरीं भूमिं गृहाण वामन उवाच हे राजन् त्रैलोक्ये यावंतो विषयाः संति ते अजितेंद्रियं याचकं पूरयितुं न समर्थाः किंच पदत्रयेणायः असंतुष्टः सः वर्षेण द्वीपेना पि च न तुष्यति एवं वैन्या[illegible]ः अर्थकामैः तृष्णां तं न गताः इति श्रुतम् यदृच्छयोपपन्नेन संतु

ष्टः स्फुरवंवर्तते असंतुष्टस्तुन किंच पुंसोऽसंतोषः संसृतिहेतुः संतोषस्तु मुक्तयेस्मृतः तथायदृच्छालाभतुष्टस्यविप्रस्यतेजः वर्द्धते
असंतोषान्नश्यति तस्मात्त्रिपदान्येववृणे एतावतैवसिद्धोऽहम् श्रीशुकउवाच एवमुक्तः बलिः हसन् आह हे बटोवांछा-
तः प्रतिगृह्यताम् एवमुक्त्वावामनायमहींदातुंजलपात्रंजग्राह विष्णवेक्ष्मांप्रदास्यंतंशिष्यंशुक्रः उवाच हे वैरोचनने एषः साक्षाद्वि
ष्णुः देवानांकार्यसाधकः कश्यपात् अदित्यांजातः किंच अस्मै यत् प्रतिश्रुतंतत् अहंसाधुनमन्ये एषः त्वत्तः स्थानैश्वर्यादिकंआ
च्छिद्यइंद्रायदास्यति अयंविश्वकायःत्रिभिःक्रमैः इमान् लोकान् क्रमिष्यति हेमूढविष्णावेसर्वस्वंदत्वाकथंवर्त्तिष्यसे एकेन-
पादन्यासेनभूमिंद्वितीयेनदिवंकायेनखंक्रममाणस्यबटोः तृतीयपादन्यासस्यक्कगतिः किंच प्रतिज्ञातंअप्रदातुः तेनरकेस्थि
तिंमन्ये येनवृत्तिःविपद्यतेतद्दानंनप्रशंसंति यतः वृत्तिमतःपुरुषात् दानंयज्ञः तपः कर्मच भवति अपिच धर्मायंयशसेऽर्थाय
कामायस्वजनायचवित्तंविभजन् पुमान् इहामुत्रचमोदते अपिच बह्वृचश्रुत्यासत्यानृतयोः व्यवस्थाप्रतिपादितासाचवृत्ति
संकटादिषु अनृतमपिननिषिद्धमिति तच्च अत्रापिबह्वृचैर्गीतंशृणु ओमितिसत्यंप्रोक्तंनेतिअनृतम् देहवृक्षस्यमूलंअनृतम्
पुष्पफलंसत्यंअतः देहेजीवतितन्नस्यात् यथाउत्पाटितमूलोवृक्षःसद्यःशुष्यति पततिच एवंनष्टानृतोदेहः तस्मात् अर्थिने-
यत्किंचिद्दास्यामीतिब्रूयात्तेनन्यूनोभवेत् अतःनेत्यनृतंवचएवपूर्णम् अन्यार्थाकर्षकंच ननुतर्हिअनृतमेवसर्वदासेव्यंस्या
त् नेत्याह सर्वंनेत्यनृतंब्रूयात् सदुष्कीर्त्तिः श्वसन् मृतः स्त्रीषुनर्मविवाहेचवृत्त्यर्थेप्राणसंकटे गोब्राह्मणार्थेहिंसायांनानृतं-
स्याज्जुगुप्सितम् ४२ इत्यष्टमेएकोनविंशः १९ श्रीशुकउवाच एवंकुलगुरुणाउक्तः बलिःक्षणंतूष्णींभूत्वाउवाच १३
हेगुरोत्वयाप्रोक्तोऽयंगृहमेधिनांधर्मःसत्यः अहोप्रागादिः अहंदास्यामीतिप्रतिज्ञायवृत्तिलोभेनकथंप्रत्याचक्षे किंच असत्या

स्मरः अधर्मः नेतिइयंभूः उवाच अलीकंनरं ऋते सर्वं सोढुमलंमन्ये अतोऽहंनरकदारिद्र्यादिभ्यः मृत्योश्चतथानबिभेमियथावि
प्रलंभनात् किंच साधवः दध्यङ् शिबिप्रभृतयः दुस्त्यजैः प्राणैरपि भूतानांश्रेयः कुर्वंति किंपुनर्धरादिषुविचारः किंच यैः दै-
त्यैः इयंभूः उपभुक्ता तेषांलोकान् भोगांश्चकालः अग्रसीत् ननुयशः अतःकीर्तिरेवसाध्या अन्यच्च युद्धेतनुत्यागिनः सुलभाः य
थातथापात्रेप्राप्तेधनत्यागिनः नअपिच शूरस्यदयालोः पुंसः अर्थिनांकामपूरणेन यत् दैन्यंतत् भद्रमेव किंपुनर्भवादृशानांदानेन
अतः एषः विष्णुः वाशत्रुर्वा स्तु अस्मै ईप्सितांक्षितिंदास्यामि यद्यपिअनागसंमां असावधर्मेणबध्नीयात्तथापिएनंभीतंरिपुंन
हिंसिष्येइति श्रीशुकउवाच एवंअनादेशकरंशिष्यंगुरुःशशाप हेबलेपंडितमानीमदाज्ञातिगःत्वमसि अतः शीघ्रंश्रियः
भ्रश्यसे एवंगुरुणाशप्तोऽपिसत्यान्नचलितः बलिःवामनायअर्चित्वाएनांददौ तदाविंध्याबलिःहैमंजलपूर्णकलशंआनिन्ये ततः
स्वयंयजमानः भगवतः श्रीमत्पादयुगंमुदाप्रक्षाल्यतदपः विश्वपावनीः मूर्ध्निदधौ तदासुरेंद्रं स्वर्गेदेवगंधर्वादयः तत्कर्मगृणंतःसंतःपु
ष्पैः ववृषुः दुंदुभयोनेदुः गंधर्वादयोजगुः अनेनबलिनारिपवेजगत्त्रयंदत्तं इदंदुष्करंकृतम् एवंवदतिसति तद्वामनंरूपंअद्भुतंअ-
वर्धत यत्ररूपेभूः खंद्यौः दिशः विवराः सागरादयश्चआसन ततोबलिः तस्यदेहे इदंविश्वंसकलात्मकंददर्श तच्चतस्यांघ्रितलेर
सातलम् पादयोर्महीम् जंघयोर्वृक्षान् जानुनिपक्षिणः ऊर्वोर्मरुतः गुह्येप्रजापतीन् जघनेदैत्यान् नाभौनभः कुक्षिषुसमुद्रान्
उरसिनक्षत्राणि हृदिधर्मम् स्तनयोः ऋतसत्ये मनसिइंदुम् वक्षसिश्रियम् भुजेषुलोकपालान् कर्णयोःदिशः मूर्ध्निद्यौः के-
शेषुमेघान् नासिकायांवायुम् अक्ष्णोःसूर्यम् मुखेअग्निम् वाण्यांछंदांसि भ्रुवोर्विधिनिषेधौ पक्ष्मसु अहोरात्रं ललाटेमन्युं
अधरेलोभं रेतसिजलं पृष्ठे अधर्मंछायासुमृत्युंहास्येमायां लोमसुओषधीः नाडीषुनदीः नखेषुशिलाः बुद्धौअजंदेवगणान् ऋषीं

श्चइंद्रियेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि एवं सर्वात्मनि इदं त्रिभुवनं वीक्ष्य सर्वे असुराः कश्मलं आपुः तदा स्फुदर्शनं शा
र्ङ्गं धनुः कौमोदकीगदा विद्याधरः असिः तूणौ सुनंदमुख्याः पार्षदाः ईशं उपतस्थुः हे राजन् तदा उरुक्रमः किरीटांगदमीनकुंडलः
श्रीवत्सकौस्तुभमेखलांबर वनमालाभिः वृतः रराज ततः त्रिविक्रमः बलेः भूमिं एकेन पदा विचक्रमे शरीरेण नभः बाहुभिः दि
शः द्वितीयेन पदा स्वर्गं तृतीयाय तदीयमण्वपि नावशिष्टं एवं उरुक्रमस्य अंघ्रिः उपर्युपरि गच्छन् महर्जनाभ्यां तपसश्च परं स
त्यलोकं गतः ३२ इत्यष्टमे विंशः २० श्रीशुक उवाच अथ सत्यलोके प्राप्तं अंघ्रिं वीक्ष्य ब्रह्मा तथा मरीच्यादयः सनंदनाद्याः
योगिनश्च वेदोपवेदनियमयमतर्केऽतिहासांगपुराणसंहिताः तत्र अगमन् ततः ववंदिरे अथ विष्णोः प्रोन्नताय अंघ्रये अर्हणो
दकमानीय भक्त्या समर्च्य ब्रह्मा अभ्यगृणात् धातुः कमंडलुजलमुरुक्रमस्य पादावनेजनपवित्रतया स्वर्धुनी अभूत् सा लोक
त्रयं पवित्रयति ततः ब्रह्मादयो लोकपालाः स्वनाथाय त्रिविक्रमाय बलिं दत्त्वा तोयैः स्रग्भिः गंधपुष्पधूपदीपैः स्तुतिजयशब्द
वाद्यादिभिः पूजयामासुः तदा जांबवान् भेरीनादैः दिक्षु महोत्सवं अघोषयत् सर्वं महीं त्रिपदयाञ्चामिषेण हृतां दृष्ट्वा क्रुद्धाः दै
त्याः ऊचुः अहो अयं ब्रह्मबंधुर्न तर्हि द्विजरूपछन्नः विष्णुः देवकार्यं चिकीर्षति अनेन शत्रुरूपिणा अस्मद्भर्तुः सत्यव्रतस्य ब
लेः सर्वस्वं हृतं अतः अस्य वधो धर्मः भर्तुः शुश्रूषणं च स्यात् एवमुक्त्वा बलेः सेवकाः वामनं हंतुं आयुधानि गृहीत्वा बलेः अनिच्छ
तः सतः प्राद्रवन् धावमानान् तान् दृष्ट्वा प्रहस्य विष्णुदूताः नंदसुनंदजयविजयप्रबलबलकुमुदकुमुदाक्षविष्वक्सेनगरुडजयं १४
तश्रुतदेवाद्याः सर्वे नागायुतबलाः उदायुधाः संतः दैत्यचमूं जघ्नुः अथ बलिः स्वकान् हन्यमानान् दृष्ट्वा शुक्रशापं स्मरन् तान् वार
यामास हे विप्रचित्ते हे राहो हे नेमे मे वचः श्रूयताम् यूयं मा युध्यत निवर्तध्वम् अयं कालः नः अर्थकृत् न यः पूर्वं देवानां अभवाय आ

सीत् सः कालः अद्यविपरीतो वर्त्तते किंच अयंजनः बलसचिव बुद्धिदुर्गादिभिः सामाद्युपायैश्च कालंन अत्येति हे दैत्याः एतेदेवाः
पूर्वं बहुशः जिताः अधुना एतेऽस्मान् जित्वानदंति य[illegible]मद्दैवं प्रसीदति तर्हि एतान् जेष्यामः तावत् यूयं प्रतीक्षध्वम् श्रीशुक
उवाच एवंबलेर्वचः श्रुत्वादैत्यदानवाः पा[illegible]ताडिताः संतः रसोविविशुः अथगरुडः प्रभुचिकीर्षितं ज्ञात्वा बलिंवारुणैः पा
शैः सोमाभिषवदिने बबंध तदाद्यावापृथिव्योः हाहाकारः आसीत् ततः पाशैः बद्धं उदार यशसं बलिं वामनः आह हे बले त्वया भू
मेः त्रिपदानिमेदत्तानि तेसर्वा मही द्वाभ्यांक्रांता तृतीयंकल्पय यावत् असौ सूर्यः गोभिः तपति तावती तव भूमिः एवंते भूर्लोकः
एकेन पदाक्रांतः तन्वास्वं दिशः द्वितीयेन स्वर्लोकः तृतीयस्य अभावात् प्रतिश्रुतं अदातुस्तेनरकवासः इष्टः अतः गुर्वनुमोदितः
सन्नरकं विश किंच विप्रलब्धोददामीतित्वयाऽहंचाढ्यमानिना तद्भूलोकफलं भुंक्ष्व निरयं कतिचित्समाः ३४ इत्यष्टमेए
कविंशः २१ श्रीशुकउवाच एवं भगवता सत्वात् चाल्यमानः बलिः अविकलं वच आह बलिरुवाच हे भगवन् मेप्र
तिज्ञातं मिथ्या न यतः त्वया वामनतयाभिक्षित्वा रूपांतरस्याविष्कृतत्वात् अथापि त्वं यदि मिथ्यामन्यसे तर्हि ऋतं करोति मे
शीर्ष्णि तृतीयं पदं कुरु हे भगवन् अहं निरयात् दुःखात् भवन्निग्रहात् चनबिभेमि असाधुवादात् यथा किंच श्रेष्ठैः अर्पितं दंडं
अहं साधु मन्ये यतः मात्रादयः तं दंडं नार्पयंति किंच त्वं असुराणां नः शत्रु छलेन वर्तमानः गुरुः असि यस्मिन् त्वयि वैरानुबंधेन ब
हवो दैत्याः सिद्धिं प्राप्ताः तेन गुरुणा त्वया निगृहीतः बद्धश्चाहं नातिव्रीडे न च व्यथे किंच मे पितामहः प्रह्लादः पित्रा हिंसां प्रापितोऽ
पि देहादीनामसारतां निश्चित्य ते ध्रुवं चरणारविंदं प्रपेदे अतः तस्यैव भाग्येन अहं तवांतिकं नीतः श्रीशुकउवाच एवं ब
लेः उक्तवतः सतः प्रह्लादः आजगाम ततः पाशबद्धो बलिः तस्मै पूर्ववत् पूजां न जहार केवलं मूर्ध्ना ननाम किं[illegible] स्वकुना हंकारादिरू

औ०८ निरयम्, औ०५ अपकीर्त्तेः

पापराधस्यस्मरणेन सव्रीडावाङ्मुखोबभूव ततःप्रह्लादःवामनंवीक्ष्यननाम प्रह्लादउवाच हेभगवन् अस्मैत्वयाइंद्रप
दंदत्तंतत्हृतम् तच्चशोभनंकृतम् अहोत्वयाएषःश्रीमदात् भ्रंशितः अयंमहान् अनुग्रहः कृतइत्यहंमन्ये एवंकृपालवेतुभ्यंनमः
श्रीशुकउवाच प्रह्लादस्यशृण्वतःसतःब्रह्माभगवंतंकिंचिद्वक्तुंप्रवृत्तः तदैवविंध्यावलिरपिवक्तुंप्रवृत्ता तांसंमानयन्सःब्र
ह्माक्षणंतूष्णींस्थितः ततःसाविंध्यावलिःबद्धंपतिंवीक्ष्यप्रांजलिःसतीउपेंद्रंबभाषे हेईश इदंजगत् त्वयाक्रीडार्थंकृतम् तत्रान्ये
कुबुद्धयःस्वाम्यंकुर्युः अस्तु हेईश अयंबलिःएवंवदति किंतत् मयातेलोकत्रयंअर्पितंतृतीयपादायदेहंसमर्प्यप्रतिश्रुतंसत्यंकु
र्वेमीत्येवंदेहादिषुस्वाम्याविष्कारेणब्रुवन् अयंकुबुद्धिःनिर्लज्जःयतः त्वमेवसर्वस्वामीअतःमंदबुद्धिंएनंकेवलंकृपयापालय
ब्रह्मोवाच हेदेवदेवहृतसर्वस्वंएनंमुंचमुंच अयंनिग्रहंनार्हति अनेनतुभ्यंभूःसर्वस्वंदेहश्चनिवेदितः अहोयस्यतेपादयोः
सलिलमात्रंदत्वाजनःसद्गतिंयाति तस्मैतुभ्यंअयंबलिःत्रिलोकींदत्तवान् सः कथंआर्तिंअर्हति श्रीभगवानुवा॰ हेब्रह्मन्
अहंयंअनुगृह्णामितदर्थान्विधुनोमि यतःद्रव्यमत्तःपुमान्लोकंमांच अवमन्यते कथंतर्हिध्रुवादिभ्यः अर्थसंपदःददासिइ
तिचेत्तत्राह हेब्रह्मन् यःमत्परःसःजन्मकर्मवयोरूपविद्यैश्वर्यादिभिःपुमान्नमुह्यति अतःभक्तेच्छयासंपदोददामि भक्तस्तु
मुह्येत् अतःतदपहाररूपमेवतस्यानुग्रहंकरोमि किंच एषःदानवेंद्रःमेमायांअजैषीत् यतःसीदन्नपिनमुह्यति किंच अयंक्षीणवि
त्तःस्थानात् च्युतःबद्धःगुरुणाशप्तोऽपिसत्यंनजहौ तथासत्यवाक्अयंधर्मंनत्यजति एषःसावर्णेऽन्तरेमदाश्रयःइंद्रःभविता ताव
सुतलंअध्यास्ताम् यत्रआध्यादयःनसंति हे बलेत्वंज्ञातिभिःसहसुतलंयाहि तेभद्रम् यत्रत्वांलोकेशाःनाभिभविष्यंति त्वदाज्ञालंघि
नःदैत्यान्मेचक्रंसूदयिष्यति सर्वतःसानुगंत्वामहंरक्षिष्ये हेवीर तत्रमांभवान्द्रक्ष्यते दैत्यानांसंगात् तेआसुरःभावःमदनुभावं-

दृष्ट्वासद्यःनंक्ष्यति इत्यष्टमेद्वाविंशः २२ श्रीशुकउवाच एवंब्रुवाणंभगवंतंबद्धांजलिःबाष्पकलाकुलेक्षणःबलिःस
द्गदयागिराअब्रवीत् बलिरुवाच हे अहंतुभ्यंत्रिलोकींदत्तवान् इदंतावदास्ताम् प्रणामोपिनसम्यक्कृतः किंतुतदर्थं
मुद्यममात्रंकृतम् तेनचकर्मतपोदानादिभिःलोकपालैरपि अलभ्यस्त्वदनुग्रहःसंपादितः अहोत्वच्चरणामप्रभावाश्चर्यमिति श्रीशु
कउवाच एवमुक्त्वाबलिःहरिंनत्वाब्रह्माणंशिवंचनत्वामुक्तःसन्दैत्यैःसहसुतलंविवेश एवंभगवान्इंद्रायस्वर्गंदत्वाअदि
तेःकामंचपूरयित्वासकलंजगत् पालयामास ततःलब्धप्रसादंपौत्रंदृष्ट्वाप्रल्हादःइदंआह प्रल्हादउवाच हेभगवन्इमंप्रसा
दंब्रह्माभवःश्रीश्चनलभते कोसौनमाह यःत्वंनःदुर्गपालोसि किंच हेआश्रयप्रद ब्रह्मादयःयस्मात्पदाब्जरससेवनात् विभूतीःअ
श्नुवते तस्यतेदाक्षिण्यदृष्टिमार्गंवयंउग्रजातयःकस्माद्धेतोःप्रापिताः एवंतवेहितंअहोचित्रम् श्रीभगवानुवाच हेवत्स
प्रल्हादतेभद्रम् त्वंपौत्रेणसहसुतलंयाहि तत्रगदापाणिंस्थितंमांद्रक्ष्यसि श्रीशुकउवाच एवंभगवदाज्ञांगृहीत्वाब-
लिनासहप्रल्हादःतंप्रणम्यनम्रःसन्महाबिलंविवेश अथश्रीहरिःऋत्विक्मध्येस्थितंभृगुंआह हेब्रह्मन्यजमानस्ययज्ञे-
यत्न्यूनंतत् संधत्स्व ब्राह्मणैर्दृष्टंसमंभवेत् शुकउवाच हेईशयस्यकर्मेश्वरःत्वंतस्यकर्मवैषम्यंकुतः किंच तेनामकी-
र्तनात् मंत्रतंत्रादिषुयत् छिद्रंतत्सर्वंअच्छिद्रंभवति अथापितेआज्ञांकरिष्यामि तेआज्ञापालनमेवपुंसांश्रेयइति श्रीशु
कउवाच हेनृपशुकःभगवदाज्ञांस्वीकृत्ययज्ञछिद्रंसंदधे हेराजन् एवंबलेःमहींभिक्षित्वाभ्रात्रेइंद्रायदिवंददौ ततःब्रह्मा
देवर्षिपितृमनुकुमारभवदक्षमरीच्यादिभिःसहकश्यपस्त्यादितेःप्रीत्यैसलोकलोकपालानांपतिंवामनंअकरोत् सर्वेषांईशे
इंद्रेसत्यपिवेददेवादीनांपालने दक्षंउपेंद्रंकल्पयांचक्रे तदासर्वभूतानिमुमुदिरे ततइंद्रःविमानेनवामनंपुरस्कृत्यदिवंनिन्ये

किंच वामनभुजगुप्तः इंद्रः त्रिभुवनं प्राप्य मुमुदे ततो ब्रह्मभवाद्याः सर्वे हरेस्तत्कर्म गायंतः संतः स्वस्थानानि जग्मुः अदितिं शशं
सिरे हे नृप एवं ते श्रोत्रघहरं त्रिविक्रमचरितं कथितम् अहो विष्णोर्महिम्नः पारं यो गृणानः भवति सः भूरजांस्यपि गणितवान्
यथा भूरजो गणन अशक्यं तथा हरिगुणानुवर्णनमिति यः इदं हरेः अवतारचरितं शृणोति सः परांगतिं याति क्रियमाणे क
र्मणीदं देवे पित्र्ये थमानुषे यत्र यत्रानुकीर्त्यते तत्तेषां सुकृतं विदुः ३१ इत्यष्टमे त्रयोविंशः २३ राजोवाच हे भगवन् हरेः
आद्यां मत्स्यावतारकथां श्रोतुमिच्छामि किंच इदं लोकनिंद्यं मात्स्यं रूपं यदर्थं धृतं एतत् नो वक्तुमर्हसि सूत उवाच रा
ज्ञा एवमुक्तः शुकः विष्णोश्चरितं प्राह श्रीशुक उवाच गोविप्रसुरसाधूनां छंदसां च रक्षां इच्छन् हरिः तनूर्धत्ते हरेः जुगुप्सि
तत्वं परिहरति उच्चनीचभूतेषु वायुरिव चरन् ईश्वरः निर्गुणत्वात् नोच्चावचत्वं भजते इति अथ गतकल्पांते नैमित्तिको लयः आसी
त् तत्र भूरादयो लोकाः समुद्रे मग्नाः आसन् तत्र लये प्राप्तनिद्रस्य धातुः मुखतो निर्गतान् वेदान् हयग्रीवः अहरत् तत् ज्ञात्वा हरिः
मात्स्यं रूपं दधार तत्र कश्चित् सत्यव्रतः नाम राजर्षिः तपः अतप्यत् यः अस्मिन् महाकल्पे विवस्वतस्तनयः श्राद्धदेव इति ख्या-
तो मनुत्वे हरिणार्पितः एकदा कृतमालायां नद्यां जलतर्पणं कुर्वतः सत्यव्रतस्य अंजल्युदके एका शफरी अभ्यपद्यत सः तां नदी-
तोये उत्ससर्ज सा तं नृपं आह हे दीनवत्सल ज्ञातिघातिभ्यो यादोभ्यो भीतां मां कथं विसृजसे तद्दीनवाक्यं श्रुत्वा कलशाप्लुतां
निधाय आश्रमं निन्ये सा एकरात्रेण वर्द्धमाना तं आह अहं कमंडलौ वस्तुं न उत्सहे विपुलं स्थानं कल्पय ततः मणिकस्थे जले
तां न्यधात् तत्रापि मुहूर्तेन हस्तत्रयं अवर्धत एतत् उदकं मे अलं न पृथुपदं देहि ततः तां आदाय सरोवरे प्राक्षिपत् तदपि सरः प्रा १६
प्य अवर्धत इदं सरः मे न स्वस्तये अतः मे अशुष्क ह्रदे निधेहि एवमुक्तः सः यत्र यत्र जलाशये नीतवान् तत्र तत्र वर्धमानां तां ह

त्वा समुद्रे प्राक्षिपत् क्षिप्यमाणा सा इदं आह हे वीर अत्र मां मकरादयः अदंति अतः इह उत्स्रष्टुं नार्हसि एवं मोहितो राजा मत्स्यं आ
ह नः मत्स्यरूपेण मोहयन् त्वं कोऽसि एवं वीर्यो जलचरः अस्माभिः पूर्वं न दृष्टः न श्रुतः यः त्वं अह्ना योजनशतं सरः व्याप्तवान् त्वं सा
क्षाद्भगवान् भूतानां अनुग्रहाय जलचररूपं धत्से अतस्तुभ्यं नमः किंच त्वया यदर्थमिदं रूपं धृतं तत् ज्ञातुमिच्छामि श्रीशु
कउवाच एवं ब्रुवाणं सत्यव्रतं मत्स्यवपुः हरिः आह श्रीभगवानुवाच हे नृप अद्यतनात् ऊर्ध्वं सप्तमे हनि अर्णवे त्रैलोक्यं
नंक्ष्यति तस्मिन् लीने सति काचित् नौः त्वां प्राप्स्यति त्वं च औषधिबीजानि आदाय सप्तर्षिभिः सह नावं आरुह्य एकार्णवे चरिष्य
सि तत्र वायुवेगेन त्वं च लां नावं प्राप्तस्य मे शृंगे वासुकिना बध्नीहि अहं सप्तर्षिभिः साकं स नावं त्वां विकर्षन् यावत् ब्राह्मी निशा
तावत् चरिष्यामि मन्महिमानं त्वं वेत्स्यसि इत्थं राजानं आदिश्य हरिः अंतर्दधे सः तं कालं अन्वैक्षत अथ राजा प्रागग्रान् दर्भा-
नास्तीर्य तत्र स्थितः हरेः पादौ चिंतयन् निषसाद ततः वर्षद्भिर्मेघैः वर्द्धमानः समुद्रः महीं प्लावयन् सन् अदृश्यत तदा सत्यव्रतः
भगवदाज्ञां ध्यायन् तावत् नावं दृष्ट्वा औषधिवीरुधः आदाय ऋषिभिः सह तां आरुरोह तदा प्री[illegible] मुनयः तं ऊचुः हे राजन् के
शवं ध्यायस्व सः अस्मान् संकटात् [illegible] धास्यति ततः राज्ञा ध्यातः हरिः प्रलयार्णवे एकशृंगधरः हैमः नियुत योजनो मत्स्यः
प्रादुर्बभूव ततो राजा तस्य शृंगे अहिना [illegible] निबध्य हरिं तुष्टाव राजोवाच अनाद्यविद्यावृतात्मसंविदः जनाः यद
नुग्रहात् यं प्राप्नुवंति सः भवान् गुरुः सन् हृदयग्रंथिं भिद्यात् किंच यस्य सेवया पुमान् मनोमलं त्यक्त्वा स्वरूपं भजेत् स
ईशः नो गुरुर्भूयात् किंच देवादयः यत्प्रसादलेशमपि कर्तुं न समर्थाः तं ईश्वरं त्वां शरणं प्रपद्ये किंच अयं जनः जनस्य अस
तीं मतिं आदिशते यया संसारं प्राप्नोति त्वं तु अमोघं ज्ञानं आदिशसे येन निजं पदं प्राप्नोति हे ईश्वर त्वं सर्वलोकस्य गुरुः सुहृ-

त्मियेश्वरश्च असि तथापिजनः अंधधीः सन् हृदिसंतं त्वांनजानाति एवंभूतंत्वां अहं शरणंप्रपद्ये हे भगवन् परमार्थप्रकाशकैःवचो
भिःनःहृद्ग्रंथीन् छिंधिस्वंरूपंप्रकाशय श्रीशुकउवाच एवंब्रुवाणंनृपंहरिः तत्त्वंमत्स्यपुराणंच अब्रवीत् नाविस्थितःसः ऋ-
षिभिः सहनन् अश्रौषीत् ततः प्रलयांते उत्थितवेधसे हरिःहयग्रीवंहत्वा वेदानानीयददौ सतु सत्यव्रतः अस्मिन्कल्पेहरेःप्र
सादात् वैवस्वतोमनुः आसीत् मत्स्यरूपिणःहरेः राज्ञश्चसंवादंश्रुत्वा पातकात् मुच्यते अयंहरेः अवतारः तं अन्वहं यः
कीर्तयेत् तस्यसंकल्पाःसिध्यंति सःपरमांगतिंयाति किंच हेराजन् यःप्रलयपयसि दैत्यंहत्वा तेनब्रह्मणःमुखेभ्यः अप
नीतं श्रुतिगणंउपादायसत्यव्रतस्य ऋषीणांच ब्रह्म अकथयत् तंजिह्ममीनं नतोस्मि इत्यष्टमेचूर्णिकायांचतुर्विंशो
ऽध्यायः २४ समाप्तोऽयंस्कंधः छ श्रीकृष्णार्पणमस्तु छ छ छ छ छ